र्जयेत् व श्रौ। कुतपरौहिणकाले विहितस्य श्राद्धस्य सायं रात्र्यादिषु प्राप्त्यभावादेवश्रा
द्धाकरणे सिद्धे कथं विहितस्य कुतपरौहिणकालसंभवे ऽप्रसिद्धकालत्व
र्जिकालांतरेपि श्राद्धं स्यादिति प्राप्तनापर्यप्रतिषेधश्च वचनानि। तदेवोक्तं। अर्द्धमुहू
र्तात्कुतपाद्यत मुहूर्तचतुष्टयं। मुहूर्तपंचकं ह्येतत्स्वधाभवनमिष्यते। इतिका
लांतरेपि श्राद्धनिमित्तावाप्तियोग्यत्वां कर्मकालत्वं न्याय्या कुतपरौहिणावेव पौ
र्व। उक्तं च। यो यस्य विहितः कालः कर्मणस्तदुपक्रमे। विद्यमानो भवेदंगं

क्रितोपक्रमे स्यात्। यदा सायंकाले त्रिचतुर्घटिकावशेषे मकरादिसंक्रांतिः जा
तायां संक्रांतिनिमित्ते श्राद्धे क्रियमाणे भोजनानंतरं विप्राणां संध्याकाले प्राप्तेऽपि
भोक्तव्यमेव विप्रैर्नात्र संध्यातिक्रमनिमित्तो निषेधः तेन कृत्स्नश्राद्धानि कुर्वीतासद्यस्तां
भोजनस्यासमापनादि व्याप्तः स्वकर्मकरणात् भवेत् परं श्राद्धतिथिनिर्णयः।
तत्राह मनुः। यस्यामस्तं रविर्याति पितरस्तामुपासते। तिथिं तेभ्यो यतो द
त्तं स्वपराह्णस्वयंभुवः। यस्यामस्तं याति सा तिथिमपराह्णव्यापिनीं पितर उपा
सते इत्यर्थः। तत्रास्तमयमात्रयोगिनी। अस्तमयसमये श्राद्धतिथेः प्रा
प्त्यपराह्णेऽपि श्राद्धनिमित्ततिथ्यभावे यदा श्राद्धं क्रियते तदा तामुपासते।
इति विध्यसंगतेः। अस्तमयपदेनापि केवलेनापराह्णोपलक्षितत्वात् उपल
क्षणापराह्णो लक्ष्यते। अन्यथा वितत्यात्यस्य इष्यते। ऋग्भिः प्रातर्दिवि देव ईयते य
जुर्वेदे तिष्ठति मध्य अह्नि सामवेदेनास्तमेति वेदैरशून्यस्त्रिभिरेति सूर्यः॥
इत्यत्र सायाह्नास्तमेत्यनेनास्तमयमात्रं विवक्ष्यते। तदपराह्णे वेदसंबंधाभावाद्वेदैरशू
न्य इत्युपसंहारो भावकल्प्येत। तस्मादस्तमयात्पूर्वमपराह्णव्यापिन्यपवा
गृहीतव्याः। एवं सति यत्र यत्रास्तमयसंबंधिन्यास्तिथ्यो श्राद्धं विहितं तत्र
तत्र तस्यामपराह्णव्यापिन्यां तिथौ श्राद्धं विहितमिति मंतव्यम्। अन्यथा कृतप
तो हि सापराह्णवाक्ये विरोधः स्यात्। यत्तु पुनः प्रतिसंवत्सरं श्राद्धं। दर्शं विसर्ज्य
मासं च पितुः सांवत्सरं दिनं। पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यते इति नारदी
यवचनाच्च पूर्वविद्धा ग्राह्येति चेत्। न हि वचनपूर्वविद्धमात्रव्यापिन्यां पूर्वतिथ्यौ वेदितव्यं।

धीयु

अथास्तमयवेलायां कलामात्रापि यः तिथिः। सैव प्रत्याब्दिके श्राद्धे ना
पराह्णव्यापिनीति वचनात्। अस्तमयोत्तरकाले या तिथिः सैव प्रत्याब्दिके श्राद्धे व
र्त्तते चेन्न दास्तमयकाल एव श्राद्धं प्राप्नोतीति वचनबलात्। अत्र्यसंध्याकालेन
तत्समीपेन श्राद्धं प्रतिषेधात्तद्दानं क्रियते इति यत्कल्पनेनातर्हि पराह्णकालेऽस्तं
तिथि अभावेन श्राद्धकरणे सैव प्रत्याब्दिके इति विधानार्थो नाम्नि हितः स्यात्। इ
तरस्यां तु पुत्रहानिरदायां प्रतिषिद्धायां तिथ्यां अनुष्ठानं च भवेत्। यां तिथिं समनुप्रा
प्य उदयं याति भास्करः। सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु। इति देव
लवचनात् अस्मदुदयास्तमययोगिन्योः तिथ्योः सकलत्वाभिधानात् पदाक
दाचिदनुकर्म विहितं तिथ्यामेव विहितं भवतीति चेन्न। यथास्तमयेवं संबंधे न सूर्यो मय
कस्तस्याः सकलत्वोक्त्यैव प्रत्येकं स्पष्टत्वं येन सकलत्वाभिधानात्।
अत्र अस्तमयवेलायां दिनद्वयेऽपि विद्यमानत्वेन नन्वायते। सैव प्रत्याब्दिक
वा इति का त्रवि धीयते। पूर्वापरा येति का वा प्रतिषिध्यते तेन पुत्रहानिदेति।
किंच। एवं परिभाषितमपास्तत्वं सकलत्वपदिष्टहानात् तदा सर्वा एवोदया
स्तमययोगित्वेन सकलान कदाचिन्नवं उक्तं तिथिरतितत्र सर्वासां सक सां
लत्वेन सर्वकर्मकालव्यापित्वात्। योयस्य विहितः कालस्तत्कालव्यापिनी
तिथिः। इति मध्याह्नव्यापिनी यास्यात्सैकोद्दिष्टे तिथिर्भवेत्। अपराह्
व्यापिनी या च पार्वणे सा तिथिर्भवेत्। इत्यादिवचनजातस्य वैयर्थ्यापत्तेः।

ला: ला:

ति० यत्वाभावाघनर्थक्यमेव स्यात् । तस्मादयमर्थो स्याद्वचनस्य कुतपस्तमपदे
२८ सौर्यमासादिदिवसमध्ये यावत्कुतपवेलाकुतपस्तमपदसन्निहितः कालः सा
याह्नत्रिमुहूर्तपंचमोहविभागस्तस्य प्रवेशो याकालमात्रव्याप्तिः सैव प्र
त्याब्दिके ग्राह्याः कस्मात् श्राद्धार्हकुतपादिमुहूर्तपंचकरूपभागव्यापित्वा
त् । नेतरा पूर्वापरा सा या कव्यापिनी । श्राद्धयोग्यमपराह्णं न व्याप्नोतीति ।
सापुत्रहानि दानग्राह्येत्यर्थः । एवं विधे वचनार्थे गृह्यमाणे नानुपपन्न
ता कापि ते । नापि वचनान्तरस्यानर्थक्यं । विरोधो वा स्पष्टं चैतत्स्पष्टं
तरे श्राद्धभाक्तः पितृगणानां यापराह्णानुयायिनी सा पुत्रहा पितृकार्ये
ला तो नस्त्वनुयायिनीति । यदेहरात्री तिथीयोक्ति प्रत्यहं श्राद्धस्य तिथिर्नल
भ्यते । पूर्वाह्नकुतपप्रभृति नास्ति तदा सैव ग्राह्या समस्तश्राद्धार्हकाल
व्यापित्वात् । यदा तु पूर्वाह्णे श्राद्धकालव्यापिनी । द्वितीयस्मिन् हृ कालं व्याप्नो
ति तदा सैव ग्राह्या । कुतपरौहिणमुख्यकालव्यापित्वात् । यदा पुनरतिक्रमेण ।
पूर्वोत्तरयोरह्नोर्मुख्यकुतपरौहिणाख्ये काले श्राद्धतिथिर्नास्ति । तदा पूर्वा
श्रान्तकल्पप्रायश्चितकालसंबंधिनी कार्या । यद्युभयत्रदिने मुख्यकालसंभवो
पूर्वैस्या समस्तकालव्यापित्वात् । परिभाषिततिथिसकलत्वाभिधानस्य त
त्कालव्यापिनी तिथिरित्याद्विना विरोधः । विरोधेच ।। स्मृतिद्वैधं तु यत्रस्या
त्तत्र धर्मावुभौ स्मृतौ स्मृतिद्वैधे हि विषयः कल्पनीयः पृथक्पृथक् । इति कल्पना
विषय

यांश्राद्धायांयदोभयदिनेकर्मकालव्यापिनीनलभ्यतेइतितेनवाउपवासादिक
र्मणोऽविहिततत्कालत्वात्तांतदावश्यकर्त्तव्यस्यकर्मणोऽत्यतिप्रसक्तत्वेन
निष्फलत्वाशंकयांतद्वदासापर्यंतितिथिःसकलत्वाभिधानंसकलत्वनिश्चयाय
वापरत्वन्तुश्राद्धप्रसंगात्तत्रअन्यदपिश्राद्धविषयंसंदेहनिरासार्थंकिंचिदुच्य
ते।तिमक्तावाथविभक्तावाकुर्युःश्राद्धंमदैवतंमघासुचततोन्यत्रनाधिकारः
इत्यादिवचनात्तत्रयत्श्राद्धंतद्विभक्तावाऽविभक्तावाऽदेवंकुर्युरितिनेदृशी
वचनव्यक्तिः।अस्यांहिवचनव्यक्तौविभक्ताविभक्तानांसर्वेषांसर्वदैकोद्दि
ष्टमेवविहितंभवति।तच्चवचनान्तरविरुद्धं।अयमर्थःदेवतंश्राद्धंविहितंनु
यन्तुकुर्युरितिविधीयमानेचसदैवतानेनकुर्युरित्यपरिहार्यात्तन्न।यसएववा
दोषः।नचादेवत्तेश्राद्धेविभक्ताविभक्तानांकर्तृत्वंविधीयतेनेनततएवदोषान्
अन्यत्रविधेयांतरंततोप्रलभ्यतेनापिउत्तरार्द्धेप्रवृत्तिंविनेतिदर्शनात्कर्तृत्वस्या
हित्यंप्रतिषिध्यतेतद्विभक्तधनेषुसाधारणधनत्वात्कथंविद्रुपपद्यते।
विभक्तेचअनुपपत्तेः।तस्मादेवमेवव्याख्येयंसदैवतंयत्श्राद्धंतत्प्रथमादि
कंएकवचननिर्देश्याविभक्ताऽविभक्तावासंभूयकुर्युरितिकर्तृबहुत्वंसंव
ध्यते।प्रयुक्तौएकवचननिर्देशादेकंतद्विभक्तावाकुर्युरितिकर्तृबहुत्वं
मतप्रश्नैकस्मिन्कर्मणियजमानाःसप्तदशमंत्रमासीरन्नितियथासप्त
दशानांसर्वंयजमानैर्यागसाधनद्रव्यंसाधारणीकृत्यसर्वैर्यागःकरणे

देवत्त

सह

ति॰ नकार्यत्वं॥ तथाग्रदैवोश्राद्धे ऽविभक्तानां विभक्तानां स्वांशप्रदानेन श्रा

२५ द्धद्वये साधारणीकृते सर्वेषां तन्त्रयोगे सहाधिकार इति किंचन तात्पर्या

र्थः। यद्यपीदमुद्देश्यविशेषणत्वेन गृहे संमार्ष्टीति वदे केवलं न विवक्षितं।

त यस्यापि यस्या एकैकस्मिन् गृहे संमार्गः क्रियते। तथा विभक्ता विभक्तैः

एकैकस्मिन्दैवतेश्राद्धे साहित्यं कर्तव्यमग्रदैवतमित्येतदुद्देश्यविशेषण

त्वे नापि नाविवादितं। एतद्दूषितमेव मातामहस्य ऐन्द्रादिनान्नादिदैवतं

तु श्राद्धादन्यत्र श्राद्धेषु पृथगधिकारविधानात्। यद्यपि नित्यश्राद्धमग्रदै

वं तथापीह नवश्राद्धादि सपिंडनांतं ग्रहीतव्यं। नवश्राद्धं सपिंडत्वं श्राद्धान्यपि

षोडशा। एकमेव न कार्याणि संभवन्ति यतेयपीति प्रदीपसोमेश्वरनिबं

धोदाहृतस्मृतिवचनात्। अतो दैवतश्राद्धादन्यत्र सांवत्सरिकादिश्राद्धे

पृथगेव नानाधिकारो विभक्तानां। न केवलं ततो ऽन्यत्र मघासु चेति।

ततो ऽन्यत्रापि सिद्धं मघासु चेति। ब्राह्मणपरिव्राजकन्यायेनेदं बोध्यं।

एतदपि प्रदीपसोमेश्वरोदाहृतवचने स्पष्टमेवोपलभ्यते। विभक्तास्तु

पृथक्कुर्युः प्रतिसंवत्सरादिकं। एकेनैव विभक्तेषु कृते सर्वैः स्यात्कृतं।

भ्रातॄणामविभक्तानामेको धर्मः प्रवर्तते। विभागे सति तेषां तु धर्मो भवेत्

पृथक्। सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु यत्कृतं। द्रव्येण चाविभक्तेन स

र्वैरेव कृतं भवेत्। सोमेश्वरनिबंधे पीदं वचनं हृदयं यमस्यापि पित्र्यः। पि

तद्दद्यात् मृतसंस्कारकर्मेत्यः। पिंडदातोद्वहनातेषांतस्याभावेन तत्क्रमात्। पिं
डशब्देन लक्षणया श्राद्धमुच्यते। पिंडादं पाहर पैत्र्यं आमित्यादिवत्। पितृ
मृतसंस्कारकर्मसपिंडत्वं नांदीश्राद्धनिमित्तान स्वपितृभ्यो दद्यात्। तेषां
मृतानामोद्वहनात्। आनुद्वहनात्। आविवाहात्। विवाहमभिव्याप्येत्यर्थः।
मृतविवाहे पिपितृनेव स्वपितृभ्यो दद्यादित्यकर्तृकं भवति। उद्वहनादिति।
आद्यविवाहमभिव्याप्य मृतसंस्कारकर्मस्विदमुच्यते। इदमेवोक्तं। स्मृ
त्यंतरे पि नांदीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे बुधः। अत ऊर्ध्वं प्रकुर्वी
त स्वयमेव महिनां किं। द्वितीयो विवाहो यदि पत्नीराहितस्य तदन्येनोद्वाह
न संस्कृतस्य संस्कारापर्याभावादाश्रमधर्मप्रयोजकत्वे स्वेपत्नीस
हितस्य तदा सति पुत्रादावपि वंतस्याभावेन तस्य पितृस्त्रीपिपुत्रस्तत्क्रमा
त्। पितृक्रमादद्यादन्य इत्यर्थ इति सिद्धं। स्मृत्यंते पितृस्त्रोस्तु जीवतो: रे
प्रि= पुत्र: कुर्वीत दारसंग्रहं। प्रीत्या नांदीमुखं प्रोक्तं नपुत्रकपंचके नेभि। तथा। पि
पुत्रां वत्सांजी वाहे गृहप्रवेशे नववेश्मनि। नामकर्मणि बालानां चूडाकर्मा
वि= दिके तथा सीमंतोन्नयने चैव पुत्रादिमुखदर्शने। नांदीमुखं पितृगणं
पूजयेत्प्रयतो गृही। पितरि जीवति देशांतरस्थे पतिते यतौ वा यदा तु
तत्सुतमन्य: संस्कारोति जातकर्मादिना तदा तस्य जनकस्यैव पितृ
भ्यो दातव्यं। यथोक्तं। पितरो जनकस्यैव तस्या यावत्कृतमनाहितं सम्माहि

ति॰ तेभ्यः पश्चात्स्वान् यजेत पितामहान्। इति। यदि पिता स्वपितरि जीवति पुत्र

३६ संस्कुरुते तदा मातृश्राद्धं तु पूर्वेषामपि तत्र शांतदनंतरं। ततो मातामहानां

वृद्धौ श्राद्धत्रयं स्मृतमिति। त्रिषु श्राद्धेषु पितरि जीवति मातृमातामहा

संबंधि श्राद्धद्वयं कुर्यात्। पितृनांदीमुखे नाधिकारः। यथाह कात्याय

नः। सपितुः पितृकृत्येष्वधिकारो न विद्यते। जीवंतमतिक्रम्य किंचि

द्दद्यादिति श्रुतेः। सपितरि सह पित्रा यो वर्तते तस्य सपितुर्विद्यमानपितृ

कस्येत्यर्थः। स्मृत्यंतरेपि। पित्र्यं जीवत्पितृनोक्तं अग्निहोमोपि याज्ञि

कः। जीवंतमतिक्रम्य किंचिद्दद्यादिति श्रुतेः। सूत्रेपि कात्यायनः। जीव

भो॰ पितृकस्य होमांत मनारंभो वेत्यनेन सूत्रेण साग्नेरपि जीवत्पितृकस्य

पिंडपितृयज्ञारंभः प्राप्तः। न वृद्धिश्राद्धे जीवंतमतिक्रम्य देयमिति प्राप्ति

प्रसववचनमस्ति। यत्तु मैत्रायणीय परिशिष्टे उद्वाहे पुत्रजनने पित्र्ये

ष्ट्यां सौमिके मरयोनामधेये ब्राह्मणाश्च ये आतेषड्ते जीवतः पितुः कुर्वीती

र्ये वसंन्यस्ते ताते च पतितेतथा। येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सु

तः। जीवत्पितुः पुत्रस्य तु पूर्वाः। तत्तेषामेव शाखिनां साग्नीनामेव पसक्ता

हस्मृतः। न जीवत्पितृकः कुर्यात् श्राद्धमग्निमृते द्विजः। येभ्यः एवापि

ता दद्यात्तेभ्यः कुर्वीत साग्निकः। पितामहो मे वमेव कुर्याज्जीवति साग्नि

कः। साग्निको पितृकार्वा नित्रा वाति पितामह इति। जीवति मातरि च जीवं

पितरि

पित्रोस्तु जीवतोः अत्र मातापित्रोरपि जीवतोः। अर्थान्मातुर्यं श्राद्धं मातृश्च नैव केवलं॥ २

त्वं एकं मात्रा सह श्राद्धमेव पितृमातृमातामहेष्ठ त्रिष्वपि जीवत्सु।
कात्यायनमतेन नास्त्येव सापत्न्योर्निरग्नेरपि मांदीमुखं। केवलं मातरं एव
२ इज्यं तु नितिसिद्धं। अमावास्यो पौर्णमास्यो श्राद्धं विहितं मासि मासि। यथा
हपितामहः। अमावास्या व्यतीपाति पौर्णमास्यष्टकासु च। विद्वान्
श्राद्धमकुर्वाणः प्रायश्चित्तीयते तु सः। व्यासोपि। नानिर्वपति यः श्राद्धं
प्रमीतपितृको द्विजः। इंदुक्षये मासि मासि प्रायश्चित्तीयते तु सः। इति।
अमावास्या द्विविधा। तत्र या चतुर्दशीविद्धा यस्या मुदयात् प्राक् चंद्रोदय
ते। सा सिनीवालीत्युच्यते। या तु द्वितीया प्रतिपत्सम्मिश्रा नष्टचंद्रा सा
कुहूरिति निगद्यते। अत्राह व्यासः। दृष्टचंद्रा सिनीवाली नष्टचंद्रा
कुहूः स्मृता। सिनीवाली सदा पित्र्ये कुहूर्दैवे तु कर्मणि। इति। अपरं च
वचनं। दर्शं च पूर्णमासं च पित्रोः सांवत्सरं दिनं। पूर्वविद्धमकुर्वाणो
नरकं प्रतिपद्यते। कात्यायनोपि निस्तु। अनाविद्धाममावास्यां मोहादज्ञान
तोपि वा। श्राद्धकर्मणि ये कुर्युस्तेषामायुः प्रहीयते। इति। एवं सति
संदेहे व्यवस्थामाह हारीतः। अनाविद्धाप्यमावास्या प्रतिपन्मिश्रिता
पि वा। पित्र्ये कर्मणि विद्वद्भिर्ग्राह्या अपराह्णकालिकी इति। मध्याह्न
व्यापिनी या च तिथिः पूर्वा परा पि वा। तदहः कर्म कुर्वीत ह्रासवृद्धी न कार
णमिति। [illegible] चंद्रक्षयम ध्यानकृतपस्तस्योक्तो म [illegible]। बोध्या पा
नापि।

ष्टा

नि॰ ३७

मेन्नातारतो यत्र कुहूर्दृश्यनुवर्त्तते। सिनीनं सा ज्ञेया पितृकार्येषु निष्फ
ला इति। अत्र पूर्वदिनार्द्धसमाप्तिमध्याह्नः तस्मात् [illegible] ततः
परस्मिन् द्वितीयेऽह्नि यदि चतुर्दश्यनुवर्त्तते तदा सिनीवालीपि
तृकर्मणि निष्फला चतुर्दश्या कुतपव्याप्तत्वात्। ग्राह्या कुतप
कालिकेति कुतपकालिकाया ग्राह्यत्ववचनात्। यदा तु दिनद्वये

वृद्धौ पि तिथिः कुतपकालीनामावास्या स्यात् तदा प्रचेतसोक्तं। सिनी

क्षये वालीं कुर्वीत श्राद्धं स्यात्तेषु श्राद्धकर्मणि स्यात्तां ते यदि मध्याह्ने श्राद्धा
र्हिस्यात् कथं तदा। तिथिक्षये सिनीवालीति पिवृद्धौ कुहूस्मृता। सा
ग्निभिः कुहूरेया वेदवेदाङ्गवेदिभिः। इति तिथिवृद्धौ कुहूस्मृतेति
वेदितव्यं कुतपस्योत्तरार्द्धमारभ्य यदा सिनीवाली प्रवृत्ता कुहूश्च कुतपस्यार्द्धमा
त्रावसाना कुहूमेव श्राद्धं साग्नेपि च कुहूर्नेया इति विधानात्। अत्र सांपि कुत
पे अमावास्याभावात्। एतच्च निरग्निद्विजस्त्रीशूद्रविषयं। यथाह लौगाक्षिः।
सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि। कुहूश्चैव प्रकर्त्तव्या शूद्रैर्विप्रै
र्निरग्निकैः। यदा उभयस्मिन्नपि कुतपे अमावास्या न लभ्यते। तदा सिनी
वाली सर्वैरेव ग्राह्या। तिथिक्षये या सिनीवालीति वचनात्। अत्र केचित् त्रिमु
हूर्त्ता कर्त्तव्या पूर्वा दर्शा तिथिर्बह्वृचैः। कुहूर्द्दर्श [illegible] कार्या [illegible] नामाग्नी [illegible]
न्येवतत् [illegible] वचनं मत्वा [illegible] सर्वे दोषत्वं भवति। माध्यंदिनं [illegible] वा।

पि

राये:

।च्छद्दर्शादावास्या। ततोऽन्यत्र धर्मो ग्निहोत्रादौ द्विजातिमात्रस्तो नैववेदे विधानात्
न तु बह्वृचादि विशेषापेक्षया श्राद्धादौ शिष्टसमाचारो व्यवस्थितो दृश्यते। नापीह वचनेऽमा
वस्याविषयः कर्मविशेषतयापादीयते बह्वृचादौ साग्नित्वनिरग्नित्वकृतो यो विशेषः।
सोपि न श्रूयते किं चायमथैव सामग्र्यातिदिश्यते ते यदि श्रमावास्यात्। कथं तर्हि छंदोगप
रिशिष्टे कात्यायनः पिंडान्वाहार्यकं श्राद्धमित्यादिनापिंडयज्ञमन्वाहार्यकं च छंदोगमरवा
नपत्नीव्यवस्थितं विधत्ते। न स्मादिदं श्रयसीमि कृतपकालादेर्विधास्त्रीभिः स्मरन्ति।
भिन्नो विरुद्धमतिः श्रितार्थे विशेषमिदमतादरवादि मिति श्रमावास्यायां क्रियायेव
पौर्णमासीश्राद्धनिर्णयो बोद्धव्यः। साग्नेः पुनरमावास्यायामपराह्ने विहितस्य पिंडपि

मनुना

तृयज्ञस्यानंतरं मन्वाहार्यश्राद्धं विहितं पितृयज्ञं निर्वर्त्य विप्रश्चंद्रक्षयेऽग्निमान् पिंडान्वाहार्यकं
श्राद्धं कुर्यान्मासानुमासिकमिति। मत्स्यपुराणेऽपि पितृयज्ञं तु निर्वर्त्य तर्पणाख्यं तु योऽग्निमा
न् पिंडान्वाहार्यकं कुर्यात् श्राद्धमिंदुक्षये सदा इति। अत्र केचिदिदं वदंति। यत्कृष्णपक्षे सन्नपश्यं
तिमतद्दह्नः पिंडपितृयज्ञं कुर्यादित्यापस्तंबवचनेन च दृष्टादर्शनेन पर्वा पिंडपितृयज्ञविधाना
त्। चंद्रादर्शनं पत्रचतुर्दशीमुहूर्तत्रयादर्वागेव स्यात् एवं नैवोत्तिष्ठोत्तिरेषा
द्वोभासिनं भवतोऽग्नाग्न्येव याधिकार्या चतुर्दश्यां चंद्रादर्शने सति पिंडपितृयज्ञ
पंपरेह्नि क्रियते। श्राद्धं चातिनीवार्ल्यां कुतपकालिकायां सामग्नि तापि क्रियते इ
तिपितयेपरेह्नि कुतपेऽमावास्यायाममावास्यायाम्। पितृयज्ञं तं निर्वर्त्येति।

७६ णोत्तरपरामाभिधानात्

ति· ३८ पितृयज्ञ शब्देन मत्स्यवचनोक्तानि कर्तव्ये ... मावास्यायां। न पिंडपितृयज्ञाभिधानं। तस्मा
त्साग्निकानां पिंडपितृयज्ञप्राप्तौ सत्यां वाल्यं कृतप कालिकायां श्राद्धमेव कर्तव्यमि
ति= ति। न देतदसत् ... मित्ताभिधानं। यथाहि। यज्ञस्नानांतरभावि प्राप्तिं प्रतर्पणानां न तस्य
देवऋषिपितृमनुष्यसाधारण्याद साधारणापितृयज्ञव्यपदेशो युज्यते। तस्मैव
साग्निकानिरग्न्योरविशेषमन्त्राम्नेयोऽग्निमान्नित्यतर्पणकां पिंडत्वाहार्यकाभिधा
नं। चार्थ्यसूत्रं। यो हनि पिंडपितृयज्ञः सर्वेषकः श्राद्धं तदा पिंडानामनु पश्चाद क्रि
यते क्रियते इति। पिंडान्वाहार्यक पदस्य योऽर्थस्तत्स्वभावात्सर्वमपीदं
वचनमनर्थकं। सर्वोहि ज्ञानान्तर्पणोकृत्येव श्राद्धमारभन्ते। तस्मात्पितृयज्ञं नि ति=
वर्त्य महायज्ञान्नर्मतदेव ... यज्ञ ... पितृभ्यः स्वधा नमः इति। दत्ति
शान पंचपारस्करादिग... हितं। पितृयज्ञं न परनामकं यो गनि मांसानि कर्पकु
त्वा पिंडान्वाहार्यकं श्राद्धं कर्यादित्यर्थः। अत्र यमेन पितृयज्ञस्य परनामकवाः। ...
न पोऽग्निमत्स्य वचनेन प्राक् पिंडपितृयज्ञादाग्नेर्मन्तो वैश्वदेवादवमहायज्ञानु
ष्ठानं विधीयते। भाविष्यत्पुराणे। स्पष्टमेतद् परिदृश्यते। मासां तं कर्म निवर्त्य वैश्व
देवं तु साग्निकः। पिंडं यज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुधैः। इति। पिंडपितृय ३
ज्ञोपि पितृयज्ञशब्देनोच्यते यथाह यज्ञपार्श्वः। अतो ... पितृयज्ञपरं
च दर्शाभिवेतावत् दर्शपवसानेतु पितृयज्ञेनुकारयेत्। ... यज्ञमस्तस्य पितृय
ज्ञस्यान्वसानप्रतीत्यान ... कारयेदितिपिंडपितृयज्ञस्याधर्युकार्त्तव्यानासिद्ध
त्वाज्ञ्योवकल्प्यते। मत्स्यवचनेपि। पितृयज्ञं निर्वर्त्यत्यादो पिंडपितृयज्ञे

पितृयज्ञशब्दः प्रयुक्तः। यदप्युक्तं अमावास्यायां यदहश्चंद्रमसं न पश्यंति त
दहः पितृयज्ञं कुर्वीत इत्यापस्तंबवचनेनाचंद्रादर्शनविहितस्य पिंडपितृयज्ञस्य
सति चंद्रदर्शने प्राप्त्यभावात् द्वितीयेऽह्नि प्रतिपदि तत्र कथं चंद्रादर्शन एव क्रि
यतां। तदप्यशोभनं। यस्यै चंद्रदर्शनेऽप्यद्येव तुर्दश्यादेर्यज्ञपार्श्वस्थतोऽपि पिं
डपितृयज्ञस्य विधानात् तत्र तैत्तिरीयश्रुत्याद्यागतः सोमो नक्षत्रालामिवह श्य
नोऽन्नं परान्हे तत्र तस्य पिंडानां करणं ध्रुवमिति। यैः पिंडैः पितृसंबंधी यज्ञः
पिंडपितृयज्ञः इत्युच्यते। तेषां पिंडानां करणं न पुनः पिंडशब्देनोपलक्षितं
प्राधान्यं पिंडपितृयज्ञशब्दे नैव केवलमुच्यते। तस्य कृत्स्नप्रकालिका यदमावास्या
यां नियतत्वात्। अपराह्ने पितृस्य इत्यभिधानं तत्र विधेयमित्याप मनस्यक्तं स्या
त्। पिंडपितृयज्ञस्य अमावास्यायामपि धीयमानेऽर्थवत्ता भवति। एष वै सोमो राजा यवाना
मन्नं यच्चंद्रमाः स एतां रात्रिं क्षीयते तस्मिन् क्षीणे ददाति। स वा अपराह्ने ददाति
पूर्वाह्णो वै देवानां मध्यंदिनो मनुष्याणामपराह्णः पितॄणां तस्मादपराह्णे ददाति।
एतेन प्रातिपद्याविहितस्य चंद्रदर्शनयपराह्णे तत्राप्यकाले द्वयस्य पिंडपितृयज्ञस्य
स्य अपराह्णे तत्काले वैतत्य तेन प्राप्तिरपि पापानादिहेतुकं भवति। अत एव चंद्रदर्श
नेतस्य परान्हे यदा चंद्रः क्षीयते तदा पिंडपितृयज्ञः कर्तव्य इति चंद्रक्षयकालश्चा। अ
ष्टमे हं शेष्वेत इह पर्याः तीयते भवति चंद्रमाः अमावास्याष्टमे भागे पुनः किलैवेत्यु
रिति। वीरावेवापि। अन्यत्र पूर्वं चतुर्दश्यां पितृयज्ञं तत्कार्यमिति।

नचन्द्रदर्शनापेक्षयामावास्यां तीते दानदंते वापि निर्वपेत् ५

ति
१९

कृत्वा यतो व्याहा पिंडान्वाहार्यकं श्राद्धं तीरोवा जनिष्पते। वासरस्य तृतीये शेनाति
संधासमीपत इति अत्र वचने तं पिंडान्वाहार्यकपदार्थो विधीयमानेऽप्यातिपिंडपि वि=
पितृयज्ञा विधीयते। तदूर्ध्वं कालविशिष्टं च श्राद्धं कृत्यपाभ्यां विहितं च क्रिय
ते। अन्यथा विशिष्टविधानानुपपत्तेः। न च तीरोराज्ञ निवृद्धे श्राण पक्षं वृत्त
त्र वचनतात्पर्यं पारिशेष्यु कारण वचनाद्या वचवतं। यदुक्तं यदहस्त्वेव दर्शनं नैति
चंद्रमाः तं ह्रि यापेक्षया तृयत्तीरोराजनि चैत्य पयश्चोक्तं। यदहस्त्वेव न चन्द्रदर्शना
पेक्षयामावास्यां प्रतीते ह्यात दंते नापि निर्वपेत् अत्रैव यदुक्तं चंद्रमसं न पश्य
तीति। न तत्तयापेक्षयामि प्रायेणात्र दर्शनं तेन तत्र यो ऽभिप्रेतः। यदहस्त्वेवं हः त
यो भवति तस्मिन्नहनि पिंडपितृयज्ञ इति। सूत्रार्थो व्याख्यातः। अत्रैव सत्त्वेव य
दहस्त्वित्यक्तं। नचन्द्रदर्शनापेक्षयां यदहरिति। यस्यामन्तर्दर्शन इति सत्र कतुरभि
प्रेतं तत्र श्राद्धं तत्त्वं वाक्यार्थः। अपराह्णवेलायां अन्तर्दशी मध्येतीराः चंद्रो भवति।
तस्मिन् काले वा पिंडपितृयज्ञं कुर्वीते अमावास्याम् वेशांति शेति व्याख्यानार्थः।
न दर्शन दृश्यं ते वा न त्र तीर भवान्चंद्रमसः। निर्वपेदिति। पिंडपितृयज्ञ पिंडा
ति विशेषः। कालमय पर्यंतायामपि चन्द्र दृश्यं पिंडान्वाहार्यकं श्राद्धं वि
धीयते। यदि द्वितीयोक्त अमावास्यायाः तपो भवति। यदा चन्द्र दृशी या
मंत्रीय मन्त्र इत्येत। अमावास्यातीयमाराणातदेव श्राद्धमिष्यते। तदेवेति
दृश्यमेव वासरस्य तृतीये प्रहरे तदेव चंद्रस्य तीयमाराणत्वात्। वासरस्यतृ

ईश्वरयावत्

रीयेप्रहरे तदेव चंद्रस्यादर्शनमावास्यात्वात् । वासरस्य तृतीये ऽंशे इति कात्यायनवचनाच्च ।
स्मृत्यंतरं च । चतुर्थयामे त्वमावास्या न दृश्यते । श्वोभूते प्रतिपद्यप्रसक्ते कथमाद्रियते क्रिये
इति । एभिर्वचनैश्चंद्रदर्शने पिंडपितृयज्ञविधायकैश्चंद्रदर्शनानिमित्ता उक्तार्थो न मन्य-
ते । कात्यायनस्तु तत्र कारो दर्शात्पूर्वेद्युः पिंडपितृयज्ञं नियमयति । पूर्वोदाहृतत्वात्पिं-
डपितृयज्ञः व्याख्यातमिदं कर्कोपाध्यायेन पूर्वेद्युरेव दर्शात्पिंडपितृयज्ञो न पश्चाद्
कृत एतत् अंगप्रतिपादकव्याकारात् । दर्शिनं प्राप्तिवाक्ये । पूर्वेद्युः पितृभ्यो य-
ज्ञं निः क्रीरणीयमन्वेष्टव्यः प्रत्तमन्त्र इत्यनया श्रुत्यैवोत्कर्षशंका निरस्ता । अत्र तं
गत्वा यतो ऽपि विधेयान्तराभावात् । क्रमपरैव श्रुतिः । तस्मादपि नोत्कर्षः पिंड
पितृयज्ञस्य ॥ तदेवं पूर्वेद्युः निर्णयेन पिंडपितृयज्ञेन उत्तरेद्युः केऽंशेऽष्टिरित्यपि वि- ८
चारितं । तदेवं पिंडपितृयज्ञेष्ट्योः पूर्वोत्तरदिनयोर्विधानादेकस्य कालनियमेनेतर-
स्यापि निर्णीतकालनिर्णयो ऽवश्यंभावी । तथापीष्टिकालो निरूपयिष्यते । तत्रामि-
लः । यः परमो विप्रकर्षः सूर्याचंद्रमसोः सा पौर्णमासी । यः परमः सन्निकर्षः
सामावास्या इति । अमा नाम रवे रश्मिः चंद्रलोके प्रतिष्ठितः । यस्मात्सोमो वस-
त्यस्यां स अमावास्या ततः स्मृता । ते च अमावास्यापौर्णमास्यौ द्विविधे । पुराणात् ।
राका चानुमतिश्चैव पौर्णमासी द्विधा स्मृता । सिनीवाली कुहूश्चैव अमावास्या
द्विधैव तु । यास्तमितकिरणा पौर्णमासी सा अनुमतिः । या प्रतिपद्युत्तरा उत्तरे सा रा-
का । या पूर्वामावास्या सा सिनीवाली । या उत्तरा सा कुहूरिति । स्मृत्यंतरे ऽपि राकाश्चा-
नुमतिश्चैव पौर्णमासी द्विधं विदुः । राका खं पूर्णबिंबस्याद्कालोनानुमतिः स्मृ-
ताः । पौर्णमासी दिवादृष्टे शशिन्यनुमतिः स्मृता । रात्रिदृष्टेऽपुनस्तस्मिन् ।

ति॰ सैव राकेति कीर्त्तिता। रात्रौ दृष्ट इति। आदित्यस्यास्तमयानंतरं दृष्ट इति विवक्षितं।
४॰ गोभिलः। त्रयः पूर्णमासीकाला भवंति। संध्यावास्तमितोदितो चेद्वा संध्योदि
ते चंद्रे संध्यास्तमिते रवौ। चंद्रोदये तूत्तरां यामस्तमयादुच्चैरुदेति। सा चैत्ताम
पवसेत्। दृष्टचंद्रामभमावास्यां सिनीवालीं प्रचक्षते। एतामेव कुहूमाहुर्न
ष्टचंद्रामथर्वयः। अत्राह गोभिलः। एतामाऽपवस्तव्याः एतादयोभिय
ष्टव्या इति। एतांताः पंचदश्यस्ताऽउपवस्तव्याः एतादयः प्रतिपदस्ताश्चाभि
यष्टव्याः लौगाक्षिणात्र विशेषो दर्शितः। श्रौतं प्रातरुपवसथ्यस्य यागस्य
चतुरो विदुः। द्वाविंशाद्युत्सृजेदंत्यो यागेत्व व्रतकर्मणीति। अत्रोपवसथ्यो
पवासस्याग्र्यांत्वाद्यांतदेशत्रीनंशान्विदुः। यागस्य चतुरोऽंशान्विदुः। अं
त्यो द्वाविंशो पंचदशीप्रतिपत्संधिभागद्युत्सृजेत्। परित्यजेत्। अंत्यमंशं पं
चदश्या व्रतकर्मणि। यागेत्व प्रतिपदश्चतुर्थमंशं। अत्रैके द्वाविंशाद्युत्सृजे
दंत्यायामिति वचनपाठं कृत्वाऽचार्याः पदेः पंचदश्या व्रतकर्मण्यंत्यामेतिप्रति गे॰
पद्युत्पर्वोऽंशधांश्चापरिहरणीय इत्याहुः। तन्न वचनादस्यार्थस्याप्रतीतिरित्ये
को दोषः। द्वितीयश्च। त्रीनंशानौपवसथ्येत्यत्र क्रमेण गणनायास्त्रयोऽंशाः
प्रतीयमानानां परित्यक्ताः स्फुः अत्र पराह्णे यंकावशेषे पर्वसंधौ परमाति पदि
व्यिक्तासे प्रतिपादि चंद्रदर्शनेनैव यागः प्रतिषिध्यत इति वचनार्थस्याऽप्र
वि धानेनामावास्या। तृतीयांशे यदा यागस्तदा पूर्वेफरमावास्या प्र

एवमांवोडपवासः। आग्र स्तेन विरोधश्चतुर्दशीयोदोषः। केनै यागस्य चतु
रोऽष्टा इत्यपेक्षया माह। यत्र पार्श्वः "पंचदश्याः परः पादः प्रतिपदादेः प्रथमा
स्त्रयः। कालः पार्वण यागे स्यादित्यप्याह नविघतो। वृद्धशातातपः। प
र्वणोय स्थानर्थ्य पंक्ष्यासाधाः प्रतिपादस्त्रयः यागकालः स विज्ञेयः प्रातरुक्तो
मनीषिभिः इति प्रतिपच्चतुर्थांशस्य यागनिषेधः। नयस्त्वेवं चतुर्थेऽं-
शे यागे प्राप्ति प्रदः क्वचित्। एषां सि वद्धिलं पंतिभ्रा निरेखासतात्तनीतिया
न भ्रान्तिः। सं धौपजेतेति। संधिरिति तत्समन्वान्त्र यागानुपपत्ते। कम पत्तः
समीपकाललक्षणया पर्वशब्द एव स्पष्टतः॥ संधिमाभितो यजेतेते प्रवृत्ता॥
भ्यामितः पदस्य उभयत इत्यर्थः। अत्र पर्वसमाप्तिकालभेदेन व्यवस्थामाह।
लौगाक्षिः। सर्वाङ्कवाप्य मध्याह्ने यदि पर्वसमाप्यते। उपोष्यते स्मिन्नहनि श्वोभू
ते याग इष्यते। गृहकारिकाऽपि। पंचदशी प्रतिपच्च समेते एकदिने। यहन्नी
यदि तस्मिन्। पंचदशी प्रहते त्युपवासः। पंचदशी हतेन यदि यागः। समे-
नेमिलते इत्यर्थः। प्रकृते दर्श इत्यामासयोरित्यर्थः। पर्वसमाप्तिज्ञाने स्फ
त्यंतरे विशेषः। तिथ्येण रस्या घटिका स्तुया स्फुटं न्यूनाल्पावाप्याधिका
स्तुनासां। अथ घंवियोज्यं तत्र प्रयोजनं ह्रासे वृद्धौ प्रथमे दिने तत्र। इति
परस्मात्तिथ्यंति पदोया घटिका न्यूना धिका वा त्वास्तां पदरं। तद्ध्रासे पू स्फ
र्वदिने पंचदशी दिने वियोज्यां वृद्धौ तु प्रयोज्यं। संयोज्यं। पूर्वतेयाप

ति. ४१

र्वसमाप्तिः सा वेला पूर्वाह्णे दिवसस्य पूर्वार्धे मध्ये मध्याह्ने पूर्वार्धे वा समाप्ते
वा संवेला तदानीमेव तस्मिन्नेवाहनि यागः कर्तव्यः । पर्वचतुर्थांशस्य यागका
लस्याविद्यमानत्वात् । अपराह्णे दिवसस्योत्तरार्धे यदि पर्वसमाप्तिः तदा तस्मि
न्नुपोष्य श्वोभूते यागः । अपराह्णेऽत्र दिवसस्य द्वितीयो भागो नापि
तृतीयो नापि पंचधा विभक्त चतुर्थो भागः । किंतु चतुर्दशी यत्र परे पंच
दशीत्यत्र वाक्ये पितृयज्ञकालविधौ द्विधा विभागस्य गृहीतत्वात् ।
मुख्यार्थ एवापराह्णशब्दार्थः । अह्नोऽपरो भागोऽपराह्णः समासविधौ
पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे इति पाणिनिस्मरणा
त् । तृतीयचतुर्थभागौ तु परिभाषितावपराह्णशब्दौ रात्रौ पर्वसमा
प्तौ तस्मिन्नेवोपोष्य द्वितीयेऽहनि यागः । पौर्णमास्यामप्येवं पूर्वाह्णे
मध्याह्ने वा पर्वसमाप्तौ तत्रैव यागः । पूर्वेद्युरुपवासः । अपराह्णे रात्रौ वा
समाप्तौ तत्रैवोपवासो द्वितीयेऽहनि यागः । अत एवाग्निप्रायेणापस्तंबेनाप्यु
क्तं । यदहः पुरस्ताच्चंद्रमाः पूर्ण उत्सर्पेत्तां पौर्णमासीमुपवसेत् । श्वः पूरिते
ति वा । एवाविकां तृतीयां वा सेवेयिनः समामनंति । यदहस्तं न दृश्यते तामामा
वास्यां श्वोभूते दृष्टार इति वा । पूर्णोऽत्सर्पित्पूर्णोऽदिया तां पौर्णमासीं राकां य
त्र पराह्णसंधौ पूर्णो धौ वा उपवसेत् । श्वः पूरितेति वा तिपरस्मिन्नहनि पूर्णो ।
भवितेति वा । यदा पूर्वां पौर्णमासीमनुमानितामुपवसेत् । पूर्वाह्णे मध्याह्ने सं

घौ मन्त्रीत्याभिप्रेतं। यदहर्न दृश्यते चंद्रमा इत्यत्र पूर्वस्त्वज्ञादनुवर्त्यते नाम
मावास्यामित्यतः परश्च इत्युपवसेदित्यनुषंगः। स्पष्टीकृता संस्तत्र्युपयस्त्रा
र्थोभाष्यार्थसंग्रहकारेणा। अपराह्ने एवा रात्रौ यदि पर्वसमाप्यते उपो
ष्या तत्र राका स्यात्सा पूर्वोत्तरपिलक्षणा॥ पूर्वाह्ने वाप्यमध्याह्ने य
दि पर्वसमाप्यते। उपोष्यात्मातिस्तत्र साश्वः पूर्विन्नलक्षणा। अपराह्ने
तृतीयायां वा पर्वसंधिर्भवेद्यदि। उपोष्या तत्र कुहूस्तत्र यदहर्नेतिलक्षणा
मध्याह्ने वाप्यवा मध्याह्ने पर्वसंधिर्यदा भवेत् तत्रोपोष्या सिनीवाली
श्वोनदृष्टार लक्षणा। खर्विका पौर्णमासी तेनैव भाष्यार्थसंग्रहकारेण
नस्या = व्याख्याता। मध्यंदिनात्प्राग्दर्शे दृष्टेत्तरोत्तरे हतीत्येति यस्मिन् प्राक् पर्वणः
संधिरिपंचत्रीया सा खर्विका वाजसनेयिमते तस्यामुपोष्या य्यप
रेद्युरिष्टिरिति। अपराह्ने षट् घटिकान्तरे दिवसे यदा पर्वसंधिर्भवति।
उत्तरदिने च प्रतिपदि षडेव घटिकान्तीयन्ते। द्वितीयायां षडेव तेत्रामा
वास्यादिने प्रातः प्रातः पर्वक्षेत्र तृतीयां शास्याविघमानत्वान्न पर्वचतुर्थांशो
यागकालो न लभ्यते। द्वितीये दिने च षट् घटिकान्तया हृष्टा दशघटिकाप्रतिप
द्भवति। तत्रापि द्वितीयातिथेः षट् घटिकाप्रवेशप्रमाणतत्त्वात्मके द्वादश
घटिकामात्रा प्रातः प्रतिपद्भ्रू येत। अत एव तस्य प्रतिपद्वतुर्थांशस्य प्रतिपि
न्नस्यसद्भावात्। विहितो यागकालो न लभ्यते। तदेवं द्विनद्वयेऽपि विहितका

लाभावात् क यागः स्यादिति संदेहः। तत्रैके प्राहुः। अपराह्णसंधिशास्त्र
बलादेव द्वितीयेऽहनि प्रतिपद्युक्तपर्वशेषेऽपि प्रतिषेधबाधितत्वाद्यागः
कार्यः। अपराह्णसंधिशास्त्रं हि निमित्तवति शेषे। प्रतिपद्युक्तपर्वशेषनिषेध शो
त्व= वाक्यमनुपात्तसंधिविशेषं सामान्यप्रवृत्तं। तेन विशेषनिष्ठेन बाध्य
त इति निवाते यथा मे वत्सपंक्तुमादित्यन्यायसिद्धमर्थं संगृह्य श्लोकेऽयं॥ सं
चिरध्वपराह्णे स्याद्यागं प्रातः परेऽहनि। कर्वाणां प्रतिपद्भागे तृतीयेऽपि तद्
ष्यति। तदिदं नातिसमंजसं विप्रतिपत्त्या बाध्यबाधकभावाविघातात्।
त तथाहि। प्रतिपद्युक्तपर्वशेषे यागनिषेधं कः प्राप्तिस्तापेदां। नचापराह्ण
तो ऽन्यत्रोवापि प्राप्तिरस्ति। ननु पन्चायोगविषयत्वा ऽन्यत्रेनाविशेषा ह
न्तः। प्रतिपदायां चतुर्थ्यां योगे यागस्थापितामेवं। पन्चादेः प्रथमा सप्तमी यः का रत्नि
लः पार्वणयागे स्यादित्यनेन तस्य पन्चादित्वेन सामान्येन प्रवृत्तस्य
प्रतिपदाद्यभागत्रये विशेषे उपसंहारात्। पुरोडाशश्रपणकरणा
स्यैवाग्नेयविशेषे। अस्ताऽपराह्णसंधिवाक्येऽप्यभ्युपगते यागे इयत्त इति॥
श्वः शब्दोऽपि पात्रप्राप्तिपन्मात्रे ऽनुपात्ताद्यविशेषे यो यागविधिस्तत्र
एव सामान्येन चतुर्थ्याः शेषप्राप्तिमुपजीव्यतां बाधितानयष्टव्यं तृतीये
ऽंशे इति तृतीयांश विशेषप्रतिषेधो यागस्य युक्तो। अस्ति हि तत्र हेमस्यैव
प्रामाण्यप्राबल्यदीप्ति विशेषमास्थाय पदादित्वेनानजहोतीति प्रतिषे

पः न यावि हितप्रतिषेधत्वात् विकल्प इत्याशंकनीयं। विधेः सामान्यवि
षयत्वेन। विशेषविशेषयत्वेन प्रतिषेधस्यैकविषयत्वाभावात्। किं
पिवाद्यपराह्णसंबंधिवाक्येन प्रतिपच्चतुर्दश्योरपि प्राप्तिः [illegible] बाधित्वा
याग एव विधीयते। तत्प्रतिविषयत्वात् प्रतिषेधशास्त्रम् प्रमाणमेवास्तु।
अथोच्यते। पूर्वाह्णमध्याह्नेऽपि पर्वसमाप्तौ प्रतिपच्चतुर्दश्योर्योगस्य प्रा
प्तिं बोधयति। नेत्र देवं पूर्वाह्णमध्याह्नसंधिशास्त्रं हि पर्वचतुर्दश्योर्योगस्य
विधायकं। ननु ततः प्रतिपच्चतुर्दश्योर्योगस्य प्राप्तिरस्ति [illegible] प्राप्यतेति
न प्रतिषेधात् पर्वकं नदवस्यामेवं [illegible] साक्षियज्ञे हि यागः पर्वतृतीयांशे
ऽपराह्णसंधावपीति चेन्मैवं। ननु पर्वचतुर्दश्यां श्वादि प्रतिपदं [illegible] यावत् प
र्वणो यच्चतुर्दश्यां [illegible] इत्यादि [illegible] पर्वण्यावयागो विहितः। स कथमावि
हिते पर्वतृतीयांशे [illegible] नाविद्यते इत्यनेन वचनेनानादित्तिकि
यते। उच्यते। पंचमी यत्र संपूर्णा द्वितीयायां [illegible] यदि [illegible]
मावास्यां [illegible] कव्यादिकी [illegible] तेन वचनेन अमावास्यान्तसमा
रभ्य षट्घटिकात्मके [illegible] पंचमी पूर्णा [illegible] दिने व्याप्य
नी द्वितीया तु यगामिनी षट्घटिकात्मके [illegible] एवं
विधं [illegible] परा [illegible] प्रातः संबंधि
तृतीयांश [illegible] यागः [illegible] विधीयते। चतुर्दश्यां [illegible] कव्यादिकं

भते

पिंडपितृयज्ञादिका क्रिया। किंच। चतुर्दशीं विकर्षेम इत्यादिभिः
अन्यवचनैरमावास्यान्वयमाश्रित्य पिंडपितृयज्ञादिकं कर्मोपदिश्यते।
यत्तु पौर्णमास्यां द्वितीयेऽह्न्यमावास्यास्तृतीयांशो सर्वे फं पितृभ्यो यज्ञेति:
श्री यस्मात्तद्देवेभ्य अतन्वत इत्यनया क्रमपरंपरया कृत्यामावास्यागः
प्राप्नोति। हंत तर्हि अपराह्णसंधिवशाद्दैः क्रियते। पर्ववत्तु पर्वांशादेशाच्च
ष्टयस्य यागांगत्वेन विहितस्य व्यवस्था क्रियते। नत्वपूर्वस्य कालांतरस्य
विधानं। अपूर्वोऽहि काले विषये यो भवेत् पर्वतृतीयांशो वा भवेत् प्रतिपच्चतु
र्थांशो वा नैतावत्पर्वतृतीयांशो विधेयः। एवं ज्ञाम अपराह्णसंधिवाक्ये
न यागे पर्ववत्तुर्थांशव्यवस्थाप्यते। अपराह्णसंधिविशेषेण प्रतिपत्तृ
तीयांशः। त्रिसंधिभूतैः प्रतिपत्तृतीयाद्वितीये प्रथमांशस्त्रि
देशमध्यरात्रो वा कालसंधिभिः क्रमेण व्यवस्थाप्यते। प्रथमेऽह्नि यागः शक्य व्य=
त इति वचनात्। प्रतिपच्चतुर्थांशस्य यागे सर्वमेव निरस्तत्वात्। तदेवं
त्रिविधकालनिर्णयपर्यालोचनया परमतयेऽपराह्णसंधौ न तस्मिन्नहनि
प्रातः पर्ववत्तुर्थांशाभावेन द्वितीयेऽहनि च प्रतिपत्तृतीयांशाभावात्।
प्रातः पर्वतृतीयांशो यागः प्राप्नोतीति सिद्धं। इयांस्तु तत्र विशेषः। उक्त
त्रयप्रविशेषेण प्रतिपदि प्रविष्टायामपराह्णात्पर्यायेत्तदूर्ध्वं प्रतिपद्य
प्रविष्टायां यागादित्विष्टिः समाप्यते। पुनः प्रयाणीय तत्त्वेष्टिः कर्तव्या।

ग। विज्ञमेरितिः। गार्ग्यप्रभृतयस्तत्र। अन्यान्यपि वचनानि द्वितीयेऽह्नि
प्रतिपत्कालीयशेषलाभमात्रेऽपि यदा वा तस्यां तिथौ सोमो दृश्यते तदा
द्वितीय ॥ मावास्यायां तत्र तीयो शेषयागं विदधति। त्रिमुहूर्ता चेत्प्रतिपदापरा कर्की ध्र
वाचीनं चन्द्रदर्शनाभिनिवदनात् तत्पर्वत्कालीयं शेषयागो विहितः। अ
न्वाधानयागयोः पूर्वोत्तरनियमात्। अन्यत्राप्यादित्येऽस्तमिते चं
द्रः प्रतीच्यामुदियात् यदा प्रतिपत्प्रतिपत्तिः स्यात् तं च दर्शयं यजेत तदा।
प्रतिपद्यानि पतिरात्रिक्रमेण यागान्यपर्वः तत्राप्रतिपदि समुद्दिष्टा वेदश्री
त्वा दधीनमतद्विले। विरमन्ति पर्वदिवा चेत् तत्र सद्यः कालत्व पौर्णमास्या।
यच्च वचनात् भूते गृहे तिवतर्द् दर्शयाममांकुर्वीत ये द्विजाः। विहारं पित्र्यं
च तत्सर्वं निष्फलं भवेत्। एतत् प्रतिपदि दर्शयागं च दर्शनविषयं तत्
९व या वचने विरोधः स्यात्। एतच्च प्रतिपदि सोमदर्शनिमत्ती स्पष्टे करणे कै
दि लिकं प्रतिवादे श्रवणं परिप्राप्तः प्रतिपत्कालीयं शेषलभ्यमाने सोमदर्श
नेन दर्शयागः प्रतिषिध्यते। नदा यजनीयेऽह्नि सोमान्नमयाद्यां तिथौ
दृश्यते। तत्र व्याहृतिभिर्हुत्वा दद्यात् द्विजातये। इति कात्यायनवचनेन
मांगल्यमेव स्यात्। त्रिमुहूर्ताद्वितीयाश्वो दृश्यते तेन वचनेन चन्द्रदर्श
नत्वाधानं विधाय पश्चद्दर्शयाम कांक्षि हितेयागे कृते द्वितीये ह्यपि प्रतिप
दि यजनीयाः क्रिसोमश्राद्धे कृच्यमानसंगतं स्यात्। तथा तस्या क्रि

ति.
४८

यजनीयत्वाभावात्। नन्वेवं स्यात्तदा यजनीयत्वात्। तत्र व्याहृतिहो-
त्वादंडदक्षिणादि ज्ञानये इति। एतन्नत्राहुतियोगान्नावात्। व्याहृतिर्निहोम
दंडदक्षिणादानं विधीयमानमुपपाकाङ्क्षिकत्वादसंगतं। सोमदर्शने न
तु पाक्षिके यागप्रतिबोधे ऽभ्युपगम्यमाने पद्ये चंद्रदर्शनेपि सत्ति यय
नेनैव वचनेन व्याहृतिहोमदंडदक्षिणादानसहितेयागो विधीयते।
न चैवमप्यवचनान्यथा एतानि सर्वाणि वचनानि यानि चतुर्दश्यामपि
न यन्वाधानादौ विधायकानि द्वितीये ऽहनि च पर्वकृत्यं यो शेषमा
गस्य तत्त्वपदे ऽवकल्पंते। प्रतिपदि सोमदर्शनं तस्याकारणस्य तत्त्वपत्न
संभवात्। न परमेष्टौ तत्रापराह्णे संधौ परतश्चंद्रदर्शनस्याभावात्। त
दुक्तं। स्मृत्यंतरे। वर्धमानाममावास्यां लक्षयेच्चेदपरेऽहनि। यामांस्त्री
नधिकांश्चापि पितृयज्ञस्ततो भवेत्। नन्वेतस्याममावास्यायां सर्वो
विभक्तिकस्तासिः। प्रतिपदि यागस्त्वपर्यांसिद्धः। न च तत्र वृद्धौ चंद्रदर्शनसंभवः।
पर्वणो ऽशेन तृतीयेन कार्यात्विष्टिर्द्विजोत्तमैः। द्वितीयासहितेयस्माच्चं
द्रन्या स्थाला यतो ऽनः सर्वाणि तमयाव्यत्र द्वितीयान्वय प्रहृश्यते न कुर्वीत वि
द्वेदेवापराह्णे रवौ। अत्र वचनद्वये यास्त्रिमुहूर्ता चंद्रमस्तो द्वितीयासाग्रा-
ह्या। वचनांतरे तस्य विशेषस्य दर्शनात्। द्वितीयां लग्नह्यमारोपविशेषो
क्तिरनार्थकास्यात्। यदा नयामतया मात्रंप्राया स्या परत स्तोप्यसाम्ये

मात्रा

न प्रतिपदपि तावतीतदा सोमदर्शने तद्यागे निवारिते पूर्वे कस्मादमावास्यात्
तीयांशे यागोऽनुष्ठि प्रीत्यल्पिकायां च द्वावपि यदि प्रतिपुत्सोमो दृश्यते।
तदा पीछमेव अपरान्हसंधिवचनेन तस्यो अते यागदर्शनं इति। प्रतिपदि
यागो विहितः स प्रतिपदि चंद्रदर्शनमात्रविषयत्वे वेदितव्यः। पौर्णमास्य
पि संधिविशेषवशात् निर्णीतस्तु तत्रायं विशेषः। अपरान्हसंधौ यदि।
द्वितीये दिने प्रातः प्रतिपत्तृतीयांशो लभ्यते। तर्हि तत्रैवेष्टिः कर्तव्या।
वे = नान्यकुर्वि च शाखे यमाप्ति पूर्वविकायां तु वाजसनेयिसमाम्नातायां पू
र्वान्हसंधिमत्यामपि उपक्रमः एव क्रियते। द्वितीये वासरे प्रतिपत्तृती
यांशोपि प्रातःकालीनो यागोऽनुष्ठीयते तृतीयांशो संभवात्। तस्मात
कोष्ठापूर्वपरे वरिष्टिरिति वचनात्। सोयं खर्विकापक्षो वैकल्पिकः।
यस्मादापस्तंबादयः स्पष्टः स्मरन्ति तत्र कान् मानि रूपो व्याप्तपूर्वान्ह मध्यान्ह सं
धौ स्मरन्ति। खर्विकां पूर्वान्हसंधिमतीं वाजसनेयपक्षे यत्नेन पौष्यामुप
मा = लभ्यते नाना मध्यन्दिनं यमापितान्हिरो धनीमस्यां पक्षे तिमनुपलभ्य परमन्याय
विदः संतो विपरीतमर्थ स्मरेयुस्तन्मन्तदपि हृदि पक्षान्तमेतमेव प्र
तः पक्षान्ति व्यवितक्रान्त। खर्विकानुमत्यो रूपवासाविषयो विकल्पः एव भ
वति। तयोर्यामास्यीस्तघः कालास्तघः समानेऽहनि यागो वान्वाधाना
धारम्भस्य यागः सायन्हकाला। अनयो पक्षयोर्व्यवस्था भाष्यार्थसंग्रह
मा =
समाप्तौ। मासघः काला। अमावाह्य कालः। यस्मां पूर्वेधु रन्वाधानादि द्वितीयेऽहनि यागः ४१

प

ति॰ ४५

कारेनोक्ता। अत्वाहितश्चत्वरशोर्गतासौः। एवं च करेण खलु पौर्णमास्यां। आ
वर्त्तनात् प्राकृयदि पर्वसंधिः स्यात्तदा वाक्रियते समाप्तिः। सर्वस्य कर्म
ण इति शेषः। कात्यायनोप्याह। संधिश्चेत्संगवादूर्ध्वं प्राक् चैव वर्जनात्
द्रवेः। सा पौर्णमासी विज्ञेया सद्यःकालविधौ तिथिरिति। तथा पौर्णमा
स्याग विषयेण यष्टव्यं चतुर्थ्यंशः इति प्रातःकालीनस्य प्रतिपच्चतुर्थ्यां
शस्य प्रतिषेधः। तत्रापस्यापर्ववत्त्वात् अन्यतः प्रतिषेधासिद्धेः दर्शयाग
नु प्रातः प्रतिपच्चतुर्थ्यांशस्यापि वपूर्वं भावितात् सोमदर्शनेनैव प्रतिपन्नासिद्धे
र्न यष्टव्यं तुरीयेंऽश इति प्रतिषेधस्यानर्थक्यं। एतेदेवनर्थक्यं तात्पर्यं परि तत
हार्यं पर्युदासो यामिति। केनचित्तुक्तं तद्दत्तानपिजंभिन्न। पौर्णमास
यागविषये पर्वत्वस्याज्ञानात्। पर्युदासपक्षे च। न यष्टव्यं तुर्यांश इति।
अवतुर्थेंशे यष्टव्यमिति विधिपरो वाक्यार्थः। तत्रकरं तांसिनाद्दिलं।
यंतीति निंदार्थवादो न संगच्छते। न हि यत्रैव यागो विहितस्तत्रैव निंद्यते। ना
तो र्थवादसंगतेरर्थज्ञानानन्यत्वात् विजृंभितं। यानि वचनानि पातित
ते भ्यो न्यत्यात्यकत्वं निर्णये नैवानिर्णीतानि विषयाणीति न लिख्यंते। षोड
स्थि शोऽहन्यक्तमे त्रिमुर्ध्यापंचदशेऽहनि वर्त्तते द्वर्शे जघन्येष्टिं पाष्पा सप्तद
शेऽहनीति। सप्तदशेऽहनीष्टिस्तु रभ्यमाणा नंदगान्वा चानादित्वासा पा
पास्सप्तदशेऽहनीत्यनेन प्रातिपि व्यनेनैवं पूर्वपक्षः। षोडशेऽहनि उपवासेच्छ

नेयागः अत एवात्र पर्वसंधानवकर्म बौधायनः प्रतिषेधयति। यत्रोपवस
थं कर्मयजनीयो वायो दर्शं भवेत्स मदर्शं वापि तत्र यत्नेन वर्जयेत्। न चात्र
यो दर्शसम्नदर्शयो रक्तो रुपवसथ्यस्या प्राप्तेरसौ प्रतिषेधो नावकल्पते। स
त्वं(=)उपवसथ्यकालः तुल्यपर्येयंति न्यायं वादो नान्वरितेन द्विवीति तद्ध वि
रुध्यतीति सर्वमनवद्यं। एवं प्रकृतिं विचारित्वा इदानीं विकृतिं विचार्यते। तस्या
प्राकृतं सर्वमंगजातमतिदेशात् प्राप्नोति। प्रातःकालः पूर्वे कृत पर्वासः।
यथोक्तपर्वस्तत्पर्वंशादिकालः। प्रतिपदि प्रविष्टायां … पूर्णतपरस्यामेव मा
दोस्तर्वास्मिन्नंगकलापे प्राप्ते अकृत्यापुनरमावास्यायां पौर्णमास्यामिष्टिः
पशुर्विधीयते। यद्ध्याप अनासोमेन यजेत। सोमावास्यायां वैव पौर्ण
मास्यां वा यजेतेति। तदपराह्णसंधौ रात्रिसंधौ प्रातःकालीनायाममावा
स्यायां पौर्णमास्यामेव विकृतानुष्ठानं कर्तव्यमित्येतद … प्रकृतानिष्टेतो तद्दर्शा
र्तमासयागो प्रातिपदेवाके योति यदा न पूर्वाह्णे पर्वसमाप्तिः तदा प्रातरेवा
प्रात्नयोः प्रकृतिविकृत्योः किमादौ कर्तव्यमित्यपेक्षायां आपस्तंबाचार्या
हः। प्रकृतेः पूर्वोक्तत्वाद पूर्वमतेस्यादिति। अपूर्वं विकृतिं प्रकृतेरंते प्रकृतेः
समाप्तेः स्य … पूर्वोक्तत्वात् प्रकृतेः एतदेवस्पष्टमाह सत्यः। अकर्तव्यं नान्याः
यादपर्वसंधिः कृत्वात् तस्मिन् प्रकृतेः विकृत्यां न देवयागः। परतो यदि स्यात्तु
तस्मिन् विकृत्या प्रकृतेः एव। पश्चाद् व्युक्तं। अत्र पूर्वदृष्टो भवति नियतं पर्व
पौर्णमास्यां वा यजेत। आपस्तंबेनापि "यदिष्ट्या यदि प

संधिः परस्तात्कृत्वा तस्मिन्न हतिन पश्चुं स यपव श्चन्वा अपरस्यापि प्रकर
निरस्य केवल पूर्वसंधि पुरस्तात्कृत्वा तस्मिन प्रकृति मध्यन्तुस्यात्पशु सयपवेति ।
अथ मलमासो निरापयेन निर्मलीकरिष्यते । तस्य लक्षणं प्रसिद्धं तेनैको
निपूंत्राबैकवारे यस्मिन् सस्यादिलक्षणः चांद्रो मासो असंक्रांतो मलमा
लः प्रकीर्तितः । अत्रहार्यनन्नु युगपूर्वकमत्र सो रा न्मा ता न्त ध्यायत्तिष्य
व ह्महिमा प्रमुणा नात् । यस्त्वनका दिविचिकित्सितवा सरायंत अत्रा
न्नात्रचापिका दिकर्मार्दी मानात् । शुक्ल प्रतिपदादि दर्शान्तान्मांवास्यां
नश्चांद्रो मासः । स यदा रविसंक्रांतिरहितो भवति तदा मलमास
इति कथ्यते । सपवकवतां तरे व्याधिमासो मासि भुक्त स्वपोदपीम
त इति पर्यायो हृदयते अमावास्या महोरात्रे यदा संक्रमते रविः सत
मासः पवित्र स्यद्तीते ह्यधिको भवेत्र अमावास्यां प्राप्य यदा तृ
हतिवाराश्चैवा रविसंक्रमति तदा चांद्रो मासः पवित्रस्यात् । यदा ॥ त
रमावास्या प्रात्र्यहोरात्रं त्री नैमिति प्राप्ते यदि संक्रमति । तदा चां
द्रो मासो ऽधिमासः स्यात् । चैत्रादर्वाक तोधिमासः परतः स्त्व
धिको भवेत् । दृष्टांतिसर्व च पा स्त्रेषुतस्मिन्नर्तिस्त्रयोदशी तस्मि
न्नाधिमासे पत्युत्तव्यं । तदा वृहस्पतिः नित्य नैमित्तिके कार्यात् प्र
यत्तः सत्मालि मुक्तोत्तो पर्यभ्याद्ग्रंगज छायाया प्रेत पक्षाद्धंत ष्येकत्र । नित्यमा

वश्यकं यत्प्रागुक्तविशेषज्ञानमात्ररूपेणैव विहितं। तन्मलमासेपि
कर्त्तव्यं। अहरहः श्राद्धपंचयज्ञादि देवार्चनातिथिपूजादि नैमित्ति
कमंग्न्यनुगमनादि तन्निमित्तपत्युरेव प्रयत्नानानियीनेनतन्निमित्तेन विहि
तं। यत्तु चन्द्रसूर्योपरागादौ जातकर्म स्नान दान श्राद्धादि तद
पि मलिम्लुचे कर्त्तव्यं। तीर्थश्राद्धं गजच्छायाश्राद्धं प्रेतश्राद्धं च मलि
म्लुचे कुर्यात्। तीर्थश्राद्धगजच्छायाश्राद्धं तदुभयं ताननित्यं अकरणे
प्रत्यवायाभावात्। नापि नैमित्तिकं। तीर्थसंबंधस्य गजच्छायाया
निमित्तस्यैव पुरुषप्रयत्नसाध्यत्वात्। अतस्तयोः पृथक् ग्रहणं।
गजच्छायात्र गजस्यैव यास्त्वर्वस्यां दिशि वर्त्तते। सा ग्राह्या। विश्वा
मित्रोक्ता। परमान्नं वयो दद्यात् पितृणां मधुना सह। छायायां
तु गजेन्द्रस्य सर्वायां दक्षिणामुखः। यदेंदुः पितृदैवत्ये हंसश्चै
व करे स्थितः। याम्या तिथिर्भवेत्सा हि गजच्छाया प्रकीर्तिता॥ इ
ति या परिभाषिता गजच्छाया साप्यत्र मुख्या। असंभवित्वा च
मलमासे हंसश्चैव करे स्थितः इति वचनात्। हंसः सूर्यः करे। हस्ते
स्थितः। तदा कन्यासंक्रांतेर्वर्तमानत्वान्मलमासत्वाभावः। प्रे
तश्राद्धं नित्यत्वेन मलमासेपि प्राप्तं। यत्तत्र पुनर्विधीयते। तत्संवत्स
रमध्यपतिते मलिम्लुचे एकं मासिकं कृत्वा द्वितीये मासि[illegible]पि

२६

ति· मत्यधिकं कुर्यादित्यन्ये । यदाह वसिष्ठः । संवत्सरमध्ये यद्य-
८१ धिमासो भवेत् । मासिकार्थं दिनमेकं वृद्धिं नयेत्कं । वृद्धवसिष्ठोपि । त=
श्राद्धीयः हनि संप्राप्ते अधिमासो भवेद्यदि श्राद्धद्वयं प्रकुर्वीत एवं
कुर्वन्न मुह्यति । श्राद्धद्वयमिति श्राद्धद्वयं कुर्याधिमासोत्तरमासयोः
कुर्वीति वासिष्ठवचनानुसारेणायेदितव्यं । यदा पुनः सप्तमासा द्वा
दशमासा एवाधिमासो भवति तदा तस्मिन्नेव मलिम्लुचे । सर्वप्रेत
श्राद्धसमापनीयं सारणां । असंक्रान्तेपि कर्त्तव्यमाब्दिकं प्रथमं द्विजैः ।
तथैव मासिकं सपिंडीकरणं तथा । आब्दिकं प्रथमं तत् नाब्दिकं य
त् आब्दिकान् मकां हत्न सर्वदिने क्रियते । मासिकं तद्वादशं । मत्ना ह
स्वेव यदाब्दिके संतं क्रियते । यदि सर्वमेव द्वादशाहादौ सपिंडकरण
न कृतं । यदा सर्गो संवत्सरे सक्रियते । तदा ष्णपणादिकं नास्ति स-
पिंडीकरणेनैव तस्यापि सिद्धेः । तदुक्तं सर्गो संवत्सरे पिंडः षोडशः
परिकीर्तितः । तेनैव सपिंडत्वं तेनैवाब्दिकं मच्यते । पिंडशब्देन श्राद्धं द्वि:
लिद्यते । षोडशः पिंडः षोडशश्राद्धमित्यर्थः । नित्यनैमित्तिकं मा
सिकादीनां प्राप्तानां प्र पंचमाह । यमः । गर्भे वा सूतिके मत्स्येयस्त्र द्वक
र्मणि मासिके । सपिंडीकरणे नित्ये नाधिमासं विवर्जयेत् । तीर्थश्रा
द्धस्नानं जपो होमो यववीहितिलादिभिः । जातकर्म किर्मणि नवश्रा

द्धं तथैव च। मघा त्रयोदशी श्राद्धं श्राद्धान्यपि च षोडश। चंद्रसूर्यग्र
हे स्नानं श्राद्धदानजपादिकं कार्याणि मलमासेपि नित्यं नैमित्तिकं त
था। जातकर्माणि यच्च श्राद्धं दर्शश्राद्धं तथैव च। मलमासेपि तत्का
र्यं व्यासस्य वचनं यथा। मलमासमृतानां तु श्राद्धं यत्प्रतिवत्सरं
मलमासेपि कर्त्तव्यं नान्येषां तु कदाचन। आब्दिकं प्रथमं यस्मात्त
त्कुर्वीत मलिम्लुचे। त्रयोदशे तु संप्राप्ते कुर्वीत पुनराब्दिकं। एतदपि
मलमासमृतविषयं। एवं वचनेऽस्याविरोधस्य दर्शनात्। अन्यथा
हि व्यासवचनविरोधः। अस्यार्थः। मलिम्लुचे मृतस्य यत्प्रथमा
ब्दिकं तन्मलिम्लुचे कुर्वीत। तस्य प्रथमाब्दिवत्सरे मलिम्लुचासंभ
वात् तृतीयवर्षे पूर्वस्मान्मलमासादन्यो मलमासो भवति तस्मा
न्मलमासे मृतस्य प्रथमाब्दिकं मलमासे कदाचिदपि न प्राप्नोति।
अतः पूर्वार्द्ध नित्यत्ववादः। यदा गच्छता कालेन मलमासमृतस्य पुनरा
ब्दिके प्राप्ते स एव मलमासो भवति। तदा तस्मिन्नेव मलमासे मलमा
समृतस्य पुनराब्दिकं प्रतिसंवत्सरविहितं श्राद्धं कुर्वीतेत्यर्थः। प्रति
संवत्सरश्राद्धेनाधिमासं विवर्जयेत्। नित्यानि यानि त्वन्यानि ता
नि श्राद्धं तथैव च। अस्य वचनस्य पूर्वार्द्धं मलमासमृतविषयमेव मलमा
सेपि कर्त्तव्यं श्राद्धं यत्प्रतिसंवत्सरे। साधिवत्सरे न कर्त्तव्यं तत् श्राद्धं तन्मृतानाह

ति॰ नि॰। अस्यापि पूर्वार्द्ध मालिम्लुच स्तत्वविषयं। संवत्सरं प्रथमाब्दिकान्त
४० न्तरवर्द्ध तत्ववित्थि येन मृतोऽपि मासे इत्येतान् मनुष्याह जातकर्मणि यस्तु
द्ध दर्शश्राद्धं तथैव च। प्रतिसंवत्सरं यच्च पूर्वभागे प्रकीर्त्तितं। पूर्वमा
ने धिकमासे प्रतिसंवत्सरं चैवेत्यस्यापि मलिम्लुच स्तत्वएवविषयः।
मासस्त्रयोदशो यत्र तत्र श्राद्धकल्पनं भवेत्। पूर्वापरावधौ तत्र कल्पं कु
र्याद्विचक्षणः। यस्मिन्राशौ गते सूर्ये विपत्तिस्याद्द्विजन्मनः। तस्मि
न्नेव कर्त्तव्यं पितृकार्यं मृताहनि। अस्यापि च व्यतेस्य मलमासमृ
तस्य प्रतिसांवत्सरिकं पुनरस्मिन्नेव मलमासे प्राप्ते कर्त्तव्यमित्य।
र्थः। अनन्ताधिमासे प्राप्ते यथान्न कर्त्तव्या। तत्तदाप घाधस्यो। व्याति
पितामहः। व स्पानु दिवसे मासः काश्यितो वादश यगोः। पूर्वार्द्धन्तु
परित्यज्य कर्त्तव्यान्युत्तरे क्रिया। पैठीनसिः। श्रौतस्मार्त्तक्रियाः
सर्वा द्वादशे मासि कीर्त्तिताः। त्रयोदशे तु सर्वास्ता निष्फला इति संस्थि
ताः। तस्मात्त्रयोदशे मासि कुर्यात्ता न कथंचन। कुर्वन्न तत्फलमेवाप्नु
कुर्यात्पापं विना प्रायम्। सामान्येन मलमासे क्रियामात्र प्रतिषेधे
प्राप्ते= प्राप्ते विशेषो धिक मासे नास्ति इति वदति। तत्र स्मृतिः न कुर्यादधि
के मासि कर्माकर्म कदाचन। मत्का नैमित्तिकं श्राद्धं तद्वित्तत्रैव कीर्त्ति
तं। कर्माकर्मपदेन काम्यं कर्मोच्यते। तद्धि फलकामैः क्रियमाणं।

त्वात्कर्म। अफलकामैरक्रियमाणत्वादकर्म। कर्मवत्तदकर्म चेति
कर्मधारयः। तथैवाह प्रजापतिः। नकुर्यादधिके मासि काम्यं
कर्म कदाचन। मृतकान्नैमित्तिकं श्राद्धं तत्क्रतं तत्रैव कीर्त्तितं। तस्य काम्य
कर्मणो अधिमासे प्रारंभः प्रतिषिध्यते। यस्य मासविशेषनाम
संबंधेन विधानं। तथा वैशाखे अक्षय्यतृतीयाव्रतस्य तस्मिन्म
लमासे वैशाखेनारंभः। ज्येष्ठे सावित्रीव्रतस्य आषाढे वा तिमी
मासव्रतानां श्रावणे जन्माष्टमीव्रतस्य। आरब्धस्य काम्यकर्म
णि समाप्तिकालादर्वाक मध्यपतिते अधिमासे पि काम्यं कर्म का
र्यं। यथा चातुर्मास्यव्रतानां कार्त्तिकावधिकानां संकल्पितानां मध्ये
परित्यागस्य संकल्पविरोधे नात्यायत्वागं तथा उपाकर्म वह्व्यं च
काव्यं पर्वोत्सवं तथा उत्तरे नियतं कुर्यान्नवैनाग्निं फलं वेत्तः। पारा
शरः। पक्षद्वये ऽर्कसंक्रांतिर्यदा न स्यात्सितासिते। तदा तन्मासिकं
कार्यमुत्तरे मासि कारयेत्। तन्मासिकशब्देन तस्मिन्वैशाखादि
संज्ञिते मासे वैशाखादिसंबंधेन यद्विहितं तदुच्यते। तदेवोत्तरे मासि
कारयेत्। नात्यत्सामान्यविहितं। रविणा लंघितो मासः श्चांद्रः ख्यातो म
लिम्लुचः। तत्राविहितं कर्म उत्तरे मासि कारयेत्। एवं षष्टिदिनो मास
स्तदर्धं मलिम्लुचे त्यक्त्वा न उत्तरे कार्यापित्र्यदेवादिका क्रिया

ति॰
४९

विवचनद्वयेमासविशेषसंबंधनामसंबंधेन याद्दिहितं तन्मलमा
सपरित्यागेनोत्तरे विधीयते। व्याघ्रः। वर्षे वर्षे तु यच्छ्राद्धं मातापित्रो
र्मृताहनि। मलमासे न तत्कार्यं व्याघ्रस्य वचनं यथा। द्वौ मासावेक
नामानौ स्यातां संवत्सरे यदि। पूर्वे तु पितृकार्याणि देवकार्याणि
चोत्तरे। पूर्वे तु पितृकार्याणि वृद्धिसंधीनि कार्याणि। उत्तरे देवका
र्याणि पवित्रारोपणानि गणेशादिकुलधर्मप्राप्तानि यान्युत्तरे
क्रियमाणानि तदुक्तानि। न वलुप्तविधिकानि भवंति। गृह्यपरिशि
ष्टात्। मलवदंति कालस्य मासं कालविदो जनाः। तेनात्र विशेषवि
ध्यामलत्वात् नावश्यकादि घेः। आवश्यकार्ये शं पूर्वमासे तद्विधेर
न्यत्र विशेषेषां मलमासे तत्रैव चेत्। यस्या मतरे मासे क्रिय
माणायां नास्ति विधिलोपः सावशेषत्वात्। यथा वसंते वसंते
ज्योतिषा यजेतेति। वसंतविहितस्य ज्योतिष्टोमस्य मलिम्लुच
वैशाखे परिग्रागतो नरस्मिन् वैशाखे क्रियमाणे स्य वसंतप
वहनत्वान्नास्ति विधिलोपः। आग्रयणमपि विशेषत्वात्। तस्मा
त्सापत्तरे पवित्रे प्राप्तेति। कल्पतरौ। अत्र वषट्कारहोमाग्नपर्व
वाग्रयणं तथा मलिम्लुचे कर्तव्यं काम्या इष्टीर्विवर्जयेत्। इति।
न दान्तिकालेशो माकाग्रयणादिवर्ज्यं। ज्योतिःपराशरः। अग्न्याधेयं
प्रतिष्ठां च यज्ञदानव्रतानि च। वेदव्रतवृषोत्सर्गचूडाकरणमेखलाः।
मांगल्यमाभिषेकं च मलमासे विवर्जयेत्। प्रतिष्ठा देवतडागवा।

परिहृत्य पारमाणामप्यापनं। यत्काम्या नित्यान्यपि पुंसवं येविधी
यमौनाद्यन्तरे संक्रांतौ क्रियमाणा येक्षकालपत्रहृत्ताभवंति। दाना
ति। महादानत्वेन याति शास्त्रे प्रसिद्धानि षोडशमहत्संज्ञकानि व्रा
तानि काम्यान्या रंभे शेषाणि प्रसिद्धानि न्येतानि मलमासे विव
र्जयेत्। यथा वापीकूपतडागादिप्रतिष्ठा यत्त कर्म च। न कुर्यान्म
लमासेपि महादानव्रतानि च। अन्यत्राप्युक्तं। उपाकर्मतत्योत्स
र्गः प्रसवाहोत्सवाष्टकाः। मासवृद्धौ पराः कार्या वर्जयित्वा तु पैतृकं।
प्रसवाहे जन्मादिने यद्युत्सवो वृद्धिमातसंज्ञकः। पैतृकं प्रेतसंबंधि
कर्म अमावास्या श्राद्धं च वर्जयित्वा। हारीतः अधिमासे न कर्तव्यं
श्राद्धमाभ्युदयं तथा। तथैव कर्म यत्काम्यं वत्सरात्प्रथमाद्दते। का
म्यमपि कर्म मलमासे नारंभेत्। वत्सरात्प्रथमाद्दते। प्रथमसंव
त्सरं विहाय श्राभ्युदयिकं मलमासे न कर्तव्यं। प्रथमेन संवत्सरे म
लमासे प्राप्ते सपिंडीकरणं विहितं तदुत्तरदिने यदाभ्युदयिकं विहितं
तन्मलमासेपि कर्तव्यं। यथोक्तं। भ्राता वा भ्रातृपुत्रो वा सपिंडः
शिष्य एव वा। सहपिंडक्रियां कृत्वा कुर्यादभ्युदयिकं ततः। इत्यत्र वाक्ये
भ्युदय शब्देनाभ्युदयिकं श्राद्धं विभाग प्रकरणे विश्वरूपाचार्ये
णा व्याख्यातं। तथा। सपिंडीकरणादूर्ध्वं यत्किंचित् श्राद्धिकं भवेत् इत्यं

ति॰ वाप्यादिवाश्च तत्तिन्न कुर्यान्मलिम्लुचे। तथा कृष्णशृंग आह। संवत्स-
५८ रावि रेकौ वै मासश्चैव त्रयोदशात्मकस्तराशा मासो सो तस्माद् दैवविग-
हितः। तस्मात्त्रयोदशो श्राद्धं न कुर्यान्नोपपत्तिः स्मृते। तस्मात्त्रयोदशे म-
लमासे श्राद्धं न कुर्यात्। ततमपि पत्नी तोपपत्तिः स्मृते। एतच्च प्रतिसां-
वत्सरिकविषयं। यथाह व्याघ्रः। वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृते-
हनि। मलमासे न तत्कार्यं व्याघ्रस्य वचनं यथेति मैत्रेके। तस्मात्त्र-
योदशं श्राद्धं न कुर्यान्नोपपत्तिः स्मृतेति पठंति। व्याख्यातं चैवमिदं।
यत्त्रयोदशं यन्मलमासे मासिकं प्राप्तं। तन्मलमासे न कार्यमिति।
तस्मात् वा स्यात् श्राद्धं त्रयोदशमपि मलमासिकार्यं तान् प्रतीदं-
वक्तव्यं। किं त्रयोदशं मासिकं किं नवा वचनेन तत्प्राप्तमिति मा-
सिकविधिवचनेषु तावदेकत्रएकादशमासिकानि श्रूयंते। श्राद्धमेका-
दशो वाह्नि द्वितीयं द्वादशे हनि। त्रतीयं न्यूनषण्मासे न्यूनसंवत्सरा-
ह्निके मासिकानि दश षोडश च प्रेत श्राद्धानि षोडशेत्यत्र वचनात् अ-
परे वं षण्मासिकाद्विके श्राद्धे स्यातां पूर्वेद्युः करे वक्ते। मासिकानि स्व-
कीये काले दिवसे द्वादश सपिंडनात् आह्निके स्यएण्यकुग्रहणमभावात् द्वाद-
शेध्यतं। पूर्वस्मिन् वचने आह्निकस्य पृथक् ग्रहणात् एकादश मा-
सिकानीत्यभिहितं। युक्तं चैतत्। द्वादशमासात्मकत्वात् संवत्सर-

एकादश मासाः संवत्सरस्येति श्रुतौ एकोद्दिष्टं तु कर्तव्यं प्रतिमासं
तु वत्सरमिति वचनात् । प्रतिमासं विहितानि मासिकानि द्वादशैव भ-
वंति । त्रयोदशं त्वन्मासिकं न क्वापि विधीयते । न च लोके प्रसिद्धं । वै-
शाखादि मृतस्य प्रथममासिकं ज्येष्ठादावेव भवति । न तु तस्मिन्नेव ।
मृतमासे पुनरस्मिन्वैशाखे शुद्धे मलमासे वा प्राप्ते द्वादशमं मासि-
कं भवति । न त्रयोदशं मृतस्त्रयोदशमासिकस्य संभवोपि वास्ति ।
कुतस्तस्य मलमासे प्रतिषेधः । वैशाखमृतस्य कृत्यास्मिन्वैशा-
खे पूर्वमेव मलमासे सति यत्प्राप्तं मासिकं तद्द्वादशमासस्यैव भवतीति
न कश्चित्त्रयोदशस्य मासिकस्य संभवः । अमावास्या श्राद्धं वैशाख-
मृतस्य द्वादशाहे कृतसपिंडकरणस्य तस्य वैशाखामावास्यायां
प्रथमं संभवति तस्मिन्वैशाखे तत्त्रयोदशं भवति । तदेवं त्वांत्या
मासिकमपि द्वितीये त्रयोदशं भवतीति मन्यमाने त्रयोदशं मासि-
कं वचनेनानिषिध्यते । नामावास्या श्राद्धमिति विवेचितं । तस्मात्त्रयो-
दशे श्राद्धं न कुर्यादित्येवं ग्रंथांतरे दृष्टकस्मीरादिपठितपाठोन्यथा पाठः ।
तस्मात्त्रयोदशे श्राद्धं न कुर्यादिंदुसंक्षये । इति । कस्यचित्पाठः । सोपि
प्रमादपाठ एव । प्रदीपग्रंथे हरिहरग्रंथे चालिखितोयं न कुर्यात्तत्रोपविष्टे
न इति पाठेन सर्वसंवादात् । व्यासवचनविरुद्धश्चैष पाठं पैनात्तक

नि०
५१

भोगि यच्छ्राद्धं दर्शश्राद्धं तथैव च। मलमासेपि तत्कार्यं व्यासस्य वचनं य
था। अतोत्र तृतीये मलमासेपि श्राद्धस्य विहितत्वात्। मासद्वयेब्दम
ध्ये तु संक्रान्तिर्न यदा भवेत्। प्राकृतस्तत्र पूर्वः स्यादधिमासस्तथोत्तर
इत्यस्माद्वचनाद्यस्मिन्नब्दे यदा द्वौ मासावसंक्रान्तौ भवतः तदा वै
परीत्येन पूर्वो मासः प्राकृतः अयमत्यर्थः उत्तरोधिमासः अधिमा
सं कथितो विधिनिषेधाः उत्तरस्मिन्मासे भवन्तीत्यभिप्रायः ज्यो
तिःसिद्धान्ते॥ घटकन्यागते सूर्ये वृश्चिके वाथ धन्विनि। मकरे वा
थ कुंभे वा नाधिमासो विधीयते॥ अस्यार्थः॥ घटस्तुला दिश्चरा।
शिशुकुंभान्तेषु स्थितेषु सूर्ये अधिमासस्य संभवो नास्ति। भाद्र
पदामावास्यायां कन्यागते सूर्ये भूत्वा अन्यामावास्यां विलंघ्य
प्रतिपदि द्वितीयायां वा तुलां गच्छति। तदा प्रतीतोऽधिमासो भवति।
कन्यागते सूर्ये षोडशदिनानि श्राद्धं प्रति विद्यमानोपि मलमासो
नास्तीत्यर्थः। कन्यासंक्रान्तिनिमित्तानां श्राद्धानां षोडशदिवसे
षु नैमित्तिकत्वात्। नैमित्तिकस्य श्राद्धस्य मलमासेपि तत्प्रतिषे
धः॥ यथाह प्रजापतिः। न कुर्यादधिके मासे काम्यं कदाचन। नै
मित्तिकं श्राद्धं तद्धि तत्रैव कीर्तितम्। नैमित्तिकं च श्राद्धं प्र
तिकन्यासंक्रान्तेः [illegible]। कन्यागते सवितरि यान्यहानि तथो

उत्तरभागे इत्यर्थः क्वचिन्न पैव पाठः ॥ पं० १२

दृष्ट्वा क्रतुभिस्तानि तुल्यानि पितृणां दत्तमक्षय्यमिति मलमास
निर्णयः ॥ इति अनंतभट्टकृतात्तिथिनिर्णयः समाप्तः ॥ अथ संक्रां
तिनिर्णयः ॥ तत्र देवीपुराणे द्वादशैव समाख्याताः समा संक्रां
तिकल्पना। सप्त धारास्तु बोद्धव्या एकैकैव पृथक्पृथक्। धारा
यमर्थः। संक्रांतिकल्पनाः संक्रांतिभेदा द्वादशैव मेषादयो मीनां
ताः समाख्याताः तेषु संक्रांतिसामान्यसंबंधेन विहितानां कर्मणां सा
माः साधारणा इत्यर्थः। उत्तरार्द्धस्यार्थः। सा पुनः संक्रांतिरेकैकैव प्र
त्येकमेव मेषादिसंभवो बोद्धव्या पृथक्पृथक्। मंदा मंदाकिनी ध्वांक्षी घोर
रूपा महोदरी एवं राक्षसी मिश्रिता चैव संक्रांति सप्तधा स्मृता। अथैकाद
श्यां श्राद्धमन्वाहार्यं च सर्वदा कर्तव्यं सततं विप्रैरन्यत्र वासरा
शरः। तत्र विष्णुसंबंधेनीयनजाना मंदादिसंज्ञा भवति। तद्
र्शयति मंदा ध्रुवक्षितीयाम्रदो मंदाकिनी तथा। क्षिप्रे ध्वांक्षी विजा
नीयादुग्रे घोरा प्रकीर्तिता। चरे महोदरी ज्ञेया क्रूरे क्रूरे च राक्षसी।
मिश्रिता चैव विज्ञेया मिश्रे ऋक्षे प्रसंक्रमे। अस्मीयवचनाद्वामस्य
मर्थः। संक्रांतिकल्पना संक्रांतिभेदा द्वादशैव। विहितप्रतिविधेः। म्न
कर्मस्सत्माः साधारणा इत्यर्थः। ध्रुवाणि त्रीण्युत्तराणि रोहिणी
च मृदुन्यनुराधा चित्रा रेवती मृगशीर्षकः क्षिप्राणि हस्ताश्विनी।

ति॰
५२

पुष्यस्य उग्राणि पूर्वात्रयं भरणी मघा च । चराणि पुनर्वसु श्रवण धनि
ष्ठा स्वाति शतभिषग् इति । क्रूराणि मूल ज्येष्ठा श्लेषा आर्द्रा । मिश्राणि ।
कृत्तिका विशाखा च । अर्कादिवारे अपि मंदादि संज्ञा ज्योतिशास्त्रे
प्रयुक्ते घोर कें क्रूर नक्षत्रे ध्वांक्षी दोत्तप्रतारके महोदरी चरे भूमिमैत्रे मं
दाकिनी क्षिप्रे महाग्रे ध्रुववेदे ध्रुवे मिश्रे मिश्रा । मृगो मत्त्वा राक्षसी दा
रुणो मंदि संक्रांति सा विनेत्रटनाड भयपोगे हष्टाहष्टवाकुलंप नवत्ति ।
मिश्रे मिश्रं फलमिति मंदादीनां दृष्टफलमाह । मंदा द्विजेषु वित्त
याते या मंदाकिनी नृपे । ध्वांक्षी वैश्येषु विज्ञेया घोरा शूद्रे सुखप्र
दा । महोदरी न चौराणां शौंडिकानां तथा वहा राक्षसी पुक्कसा
दीनां येवान्ये क्रूरकर्मिणः । सर्वेषामेव कारूणां मिश्रिका प्रति
वाहिनी । वेलाविशेषफले विशेषमाह । नृपापीडां तेव पूर्वाह्ने
मध्याह्ने न द्विजोत्तमाः । अपराह्ने तथा वैश्यामस्ताशत्तामितिर
वौ । पिशाचा सप्रदोषे च अर्द्धरात्रे च राक्षसाः । अपररात्रे च पीड्यंते न
र्त्तकाः । कालेन संक्रांतिर्दृत्ति गोस्वामिनो जनान् हंति प्रव्राजिता
न् सर्वान् संध्याकालेन संशयः । तथा संक्रांतीनां महाशर्ये कुक
र्म्मिषु पुण्यकालविशेषमाह । अतीतानागतो भोगा नाड्यः पंचद
श स्मृताः पुण्यपापविभागेन फलं स्त्रीप्रयच्छति । देवी संक्रांतिः ।

अतीते

मंदादीनां पुनः आयनमं विशेषमाह । त्रिंशत्कः पंचसप्ताहस्त्वेव द्वादश
एकस्य । क्रमेण घटिका ह्येतास्तत्पुण्यं परमार्थिकं । पारमार्थिकं वा
स्तवहत्यर्थः । अनंतवासमयेन क्रमेणमासिपत्वादिक्रमेणानेक सूक्ष्म
क्ष्माविभागेन देवी सर्वगता विभो । देवी कालगता वत्स यथ्याप्त त्मा
प्रकीर्तिता । सा यका सर्वकामानां महाभयाविनाशिनी । एकधाय
कृतकर्मकोटिकोटिगुणं भवेत् । धर्म्माः क्षिवकृत्ते ह्याह राज्यपुत्रा ।
दरस्वादयः । अत्र धर्म्म ग्राधिपशोकादिविषुवा यत्संनिधौ पविषु
वेषुवयद्रा हृदत्तं भवति वाह्नयं । एवं विष्णुपदे चैव षडशीतिमुखे ।
षुवा । अयने षु विकल्पो यत्तोनिग दितः प्रकरणे । यावद्विंशति क ।
लाअंतकालस्तत्पुण्यं तत्परायणो । निरंशे भास्करे दृष्टे दिनांते दनि ।
नै = णायणो । अयमर्थः । विषुवत्यादि दशासु संक्रांतिषु अत्र दव्वत्तेव
दशादि घटिकात्मके पुण्यकाले जपदान स्नानतर्पणादि माद
वहज्ञाश्राद्धादिना पुण्यविशेषमुक्त्वा अयनद्वये पुण्यकालविशे ।
षमाह । अयने षु पो विकल्प इति । तत्र प्रकरणे । निरंशे भास्करे दृष्टे
इति । घतास्त्रिंशांशाहि मते भास्करे दृष्टे अंगणो तथा शास्त्र दृष्टो दृष्ट
इत्यर्थः । एवं संज्ञाय पाने उत्तरायणकाले सति यावद्विंशति कला ।
अयने ना विंशति घटिका मुक्ता यत्तपो निःयसंवं धान्ना वा धिक्षुकत्या

ति॰ दिवसस्य संक्रान्तिषु स्नानतर्पणादेस्तु जपहोमप्रभृतिनाय
५२ त्पुण्यफलमुक्तं। तत्पुण्यं सर्वं उत्तरायणे स्नानजपहोमादिना प्रा
प्नुयादित्यर्थः। तुल्यार्द्धे दे। तु भुक्तादिनान्ते दक्षिणायन इति। देवस्यो
त्तरायनस्यान्ते। अत्र यतेर्दक्षिणोत्तरायणयोर्विधानान्तरं स्वल्पमित्तिषु रा
णेक्ववनात्। मिथुने त्रिंशांशे विंशति घटिका वर्षोषे सति यदुत्त
रायनकाले स्नानजपादिना यत्पुण्यं मुक्तं जद्दक्षिणायनेपी। फल
तिविकल्पः। विशिष्टकल्पो विकल्पः विशेषो वेत्ति यद्गुणान्तान्त।
येनोक्तं। अर्वाक् षोडश विज्ञेया नाड्यः पश्चाच्च षोडश। कालः पु
ण्ययोर्कसंक्रान्तेर्विद्वद्भिः परिकीर्तितः। संक्रान्तौ यानि दत्तानि हव्य
कव्यानि दातृभिः। तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनि। अत्रा
दावन्ते षोडश घटिका मेको भागः। स दीर्घो ह्यभिप्रायेणाविरो गउ
धः जाबालेनापि। संक्रान्तिपुण्यकालस्तु षोडशोभयतः कलाः। त्वं
डस्वर्येपरागेतु यावद्दर्शनगोचरः। पत्र संक्रान्तौ सयमहा
कालस्तु प्रकीर्तितः। इति सर्वत्र गौणकालेतु कर्मबोधितं मा
चरेत्। इति गौणकालेपि स्नानदानादिविधिनाद् तद्विषयाभि।
न्यमपि भावविरोधः। अन्तोऽपि द्विविजानन्ता सतस्पास संक्रान्तिषु उभयपंच
दश षोडश घटिकात्मकः पुण्यकालो ग्राह्यः। उत्तरायणे त्वां तेविं।

विंशति

शतिघटिकात्मको मध्यो भागो ग्राह्यः। दक्षिणायने घटिकात्मका
कालभागः संक्रान्तिकालात्पूर्वमेव ग्राह्यः। तथा मंदादिसंक्रान्तिविशे-
षेषु त्रिचत्वः पंचसप्ताष्टदशद्वादशपक्षवेन्यत्रोक्त उभयप्रतिचत्वः पं-
चघटिकात्मकः कालो निर्णयत्नममत्वेनयायाः संनिहितत्वात् अः
लासामप्यपत्नमोस्मत्ता इतिवचनाश्च संनिहितत्वेन ग्राह्यः। सौम्या
त्रिरात्रायनेविस्मपदेन पादौ दानायनंतोविष्णुवत्समध्ये-
व दत्तमतीति षडशीतिविके महर्षयः स्वल्पयनेच सौम्ये त्रिंशत्कर्वट
केनान्यो मकरे विंशतिः स्मृताः। वर्तमानेतुला मेषवेनाड्यस्तूभय
तो दशः। इत्यादीनि वाक्यानि द्विविधादशात्तापिसंक्रान्तिषु जाता-
स्वत्रादिमध्यावसानेभोगपर्याय उणपकालप्रतिपादकानिप्राय
तमत्वाभिप्रायेणोरुनरुभयत्र उणपकालनिषेधपराणीत्यर्थव्यथा
मिति। अथ रात्रौ सर्वास्मरविसंक्रान्तिजातातस्यविचारः प्रत्यपर्ते त
दा देवी उपरागोभयसंहरौ गृह्णरात्रे वेदुदये स्नापयेपिव। मानाद्रंभास्क
रे पुण्यये महरणे शर्वरीदले इत्यस्यायमेवार्थः। विद्यादिस्वास्तमन
कालहर्द्धं घटिकैकान्यनार्द्धरात्रात्पूर्वमुदये देव दिनोदये किंतुमकरा-
दिषड्राशिप्रकृतत्वरविसंक्रमणैनायनेतोमकरादिषट्संक्रान्तिषु जा-
तास्वित्यर्थः। भक्तोरर्व्यास्तमनादूर्ध्वं घटिकान्यूनार्द्धरात्रात्पूर्वं मकरा

मकोः

माना:

ति. दिकर्कादिषु द्वादशस्वपि रविसंक्रमणेषु नास्मिन्नेव भास्करे पूर्वदि
५८ नार्द्धावसाने दिने द्वे सार्द्धसप्तमुहूर्त्तलक्षणं पुण्यमित्यर्थः। विघ
दिघटिकैकाधिकार्द्धरात्रादूर्द्ध्वं मध्यरात्रे शर्वरीदले इत्यन्तादित्यादि
त्ये सति मकरादिककर्कादिद्वादशसंक्रान्तयः स्फुः। तदा परस्मिन्दिने
पूर्वदिनमाना द्वे सार्द्धसप्तमुहूर्त्तलक्षणं पुण्यमिति। देवोत्तरकोनवि
कृतवान्। अर्द्धरात्रे तु संस्पर्शे दिवा पुण्यमवाप्नुयात्। संस्पर्शमुभयोर्यद्येकम
तिरेके परेऽहनि। अस्यायमेवार्थः। रव्यस्तमयादूर्द्ध्वं घटिकान्यूना
धः= र्द्धरात्रात्पूर्वं मकरादिककर्कादिष्वपि राशिषु सूर्यसंक्रमे सति मध्यता
गतसंक्रान्तिकालात्पूर्वं पूर्वदिनार्द्धावसाना द्वे पुण्यकाला इति
त्व= तेऽर्थः। संस्पर्शमुभयोर्यदीति मध्यरात्रलक्षणमुहूर्त्तमध्ये यदि
द्वादशस्वपि रविसंक्रान्तिषु जाता सा उभयदिनेऽपि वक्ष्यमाणसंस्पर्श
का वाक्यव्यवस्थायां दिनमाना द्वे पुण्यान्ते च। नवा लिना। आदौ पु
ण्यं विजानीयाद्यया भिन्ना तिथिर्भवेत्। अर्द्धरात्रे व्यतीते तु क्रिये
यं वा परेऽहनि। अर्द्धरात्रेऽन संस्पर्शे यद्वा संक्रमते रविः। तदा दिनद्वयं
पुण्यमत्रापि मकरकर्कटौ। अस्यायमर्थः। यदा मध्यरात्रसमये द्वा
दशराशीनां मध्यात्कस्मिंश्चिद्राशौ रविः संक्रमति। तस्मिन्सं
क्रान्तिसमये या तिथिश्चिरस्मि। सा चेत्पूर्वदिनव्यापिनी तदा आदौ।

पूर्वदिनावसानं पुण्यं। अथ यद्यपरदिनव्यापिनी तदा परदिने पुण्यं। य
पूर्वेद्युरर्धरात्रादूर्ध्वं रवेः संक्रमः स्यात्। तदा द्वितीये वा दिवसे तत्तन्नित्यभा
वेऽपि पुण्यकालस्याद्यं यदा च संहरति मध्यरात्रसमये संजाता संक्रां
ति समयं कालेऽपि तिथ्यरस्मि। सा च पूर्वदिनोत्तरार्धं द्वितीयादि
नपूर्वार्धं च व्याप्नोति। मकरकर्कटौ हित्वा सर्वसंक्रान्तिषु दिन
यं पुण्यं भवति। पित्र्यकर्माणि पूर्वदिने दैवे परदिनमिति। पूर्वाह्णो
वै देवानां मध्यंदिनो मनुष्याणां अपराह्णः पितॄणामिति श्रुतेः।
तत्र मकरसंक्रान्तौ परदिनार्धं पुण्यं कर्कसंक्रान्तौ पूर्वमिति।
–व्य ग्राह्यः। अतिरेकोपरे हि न्यूनातिघटिकैकादिकमध्यरात्रादूर्ध्वं
सर्वसंक्रान्तिषु परदिने पूर्वदिने मानार्धं पुण्यमित्येवं विधेर्वे
गृह्यमाणे नाल्पपन्नता। काश्चिद्दुर हा तत्र श्रुता वेदेन परभोगं
पूर्वे वा च परे वा च बली यत्त्वान्यमित्यस्य तिथिवारस्याश्रयेत।
यत्रोभयत्र योगः स्यात् पूर्वे वा च परे वा च। एवं तत्राश्रयेद्भोगव्यतो
ने चोत्तरा परो धर्मप्रवृत्तिरपि। अथासन्नसंक्रमपुण्यं दिनार्धं स्नान
दानयोः। रात्रौ संक्रमणे भानोर्विषुवत्यपने दिवा। यायाः सन्निहि
तानाड्यस्तास्ताः पुण्यतमा मताः। रविसंक्रान्तौ सूर्यस्य सयनादि
पूर्वसंक्रान्तिषु संक्रमणे संक्रान्तिकालासन्नं द्विविधं दिनार्धं पुण्यं तत्र।

नि॰ पिसंन्निहितासंन्निहितेन नाडीनां पुण्यत्वमत्वं च पुण्यतरत्वं पुण्य
५५ मिति। यच्चसावित्र्योत्तरे। अर्द्धरात्रिकयान्यूने यदा संक्रमते रविः।
तदा पूर्वदिनो भागः कालातीते परेहनि। विषुवे ब्रह्ममुहूर्त्तः स्यात्
षडशीति सुखदं तथा विज्ञेयं त्रीणि पुण्यानि कवयो विदुः। यदपि धनुर्मी
नावतिक्रम्य कन्यां वा मिथुनं यदा। पूर्वापरविभागेन रात्रौ संक्रम
ते रविः। दिनांते पंचनाड्यस्तु पुण्याः प्रोक्ता मनीषिभिः। उदिते च त
था पंच दैवे पित्र्ये च कर्मणीति। तत्पुण्यतमापेक्षयेत्यविरोधः।
अन्यत्राप्युक्तं। अर्द्धरात्रे कलाहीने संक्रान्तिर्यदहर्भवेत्। तदहः
पुण्यमिच्छंति गर्गगालवगौतमाः। पूर्णे चेदर्द्धरात्रे संक्रान्तिर्यद
हर्भवेत्। तदा दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटौ। भविष्यत्यय
ने पुण्यास्त्रिंशद्देवाहिदत्तिरो अतीते उत्तरे नाड्य इति प्राहुः पुरा
विदः। पुण्या विषुवती प्रोक्ता दश पूर्वा दश पराः। घटिका पुण्य
कालस्तैः स्नानदानजपादिषु इति। एतान्यपि वाक्यानि देवीपुराण
जाबालदिवाकराणामनुसारेण व्याख्येयानि इति। नारदीयेपि।
अयनं छिन्नभागार्द्धकाला षोडशसंक्रमे। अर्वाक् चेदत्ते एभोगोव्य
तीते चोत्तरायणे अत्रापि पूर्ववत्त्व्यवस्था कार्या। अत्र एवं संति पु
ण्या दिवा केचित् निशायामयनद्वयेन्येतरर विसंक्रांति षुवरात्रौ भो।

गस्यनिषिद्धत्वात् दिवैव तद्योगस्तत्रेति सिद्धं। नक्तं रात्रौ स्नानं कुर्वीत
दानं चैव विशेषतः। नैमित्तिकं तु कुर्वीत स्नानं दानं च रात्रिषु। च्छाया
न्ते विवाहे यात्रायां तथा पुस्तकवाचने। दानान्येतानि शस्तानि रा
त्रौ देवालये तथा। ग्रहणोद्वाहसंक्रान्तिव्यापत्तिप्रसवेष्वपि श्रावा
रोगे चेति दासानां रात्रौ दानं प्रशस्यते। तथा राहुदर्शनसंक्रान्ति
विवाहात्ययवृद्धिषु। स्नानदानादिकं कार्यं निशि काम्यव्रतेषु च।
इत्यादीति स्मृत्यादिवचनानि रात्रावपि संक्रान्तिनिमित्तभोग
प्रतिपादकानि नात्यर्कं तत्र संक्रान्तिविषयाणीति। उक्तं च। छंदो
गपरिशिष्टे कात्यायनेन। श्रुतिद्वैधं यत्र स्यात्तत्र धर्मावुभौ स्मृ
तौ। स्मृतिद्वैधे तु विषयः। कल्पनीयः पृथक् पृथक्। इति वचनात्
व्यवस्थितो विकल्पः। सोमभौमादिष्वपि संक्रान्तिषु पुण्यकाल
स्योक्तत्वात् तथा दानधर्मो नैमित्तिकोक्तः। तत्र राशयोः रविसंक्रा
मे स्पर्शात्कथ्यत्रापि रसेंदुनाड्यः पुण्याः स्त्येवं दोस्तु परापलैर्युगैरेके
कनाडी मुनिभिः शुभोक्ता। नाड्यः श्चतस्रः फलानि अजस्य बुधस्यास्ति
सप्तपलैर्विष्टयुक्ता। सप्तधास्त्विनाड्यः पलसप्तयुक्ता गुरोश्च शुक्रे सफ
ला प्रवृत्तः। द्विनगैर्नाड्यः पलसप्तयुक्ता। शनैश्चरस्यापि हित्वा
श्च पुण्याश्च घर्षितमध्ये जपहोमकर्वेनिवाप्नोति स्वरे रधामं। इत्यादि

नि॰ ५६

वचनैरर्कसंक्रान्तिविषयमभिधीयते। यत्तु स्मृत्यन्तरवचनं पु
ण्यकालमतिपाते च तथा संक्रमणे रवेः। राहोश्च दर्शने मुक्तौ
प्रशस्तानीत्यन्यानि शोतिः। तत्तु तरभोगादिवेदनार्थस्तरवि
संक्रान्तिफलकथनार्थं वित्तप्रमादादिना स्नानाद्यकरणे रात्र्यामपि
गौणकाले चानित्यकर्मकसंक्रान्तिनिमित्तस्नानदानादि परमिति।
उक्तं च। स्मृत्यन्तरे दिनोदितानि कर्माणि प्रमादादकृतानि ता
निशायाः प्रहरं यावत्तानि सर्वाणि कारयेत्। तिथ्यासा
ददाशुपारणोत्थ्यकं। दिनकर्मोदितं सर्वं कर्तव्यं पार्वणादिकं। नैवासि
द्धिमवाप्नोति तद्रात्रौ विधीयते इति। स्मृत्यन्तरेऽपि सर्वत्र गौण
कालेन कर्मणोऽप्रतिमाचरेत्। न मुख्यत्वेनेत्यवगम्य। यथा च
त्कोशिदा धृतिकेऽप्युक्तं। अस्तंगते यदा सूर्ये कृषे जाति दिवाकरः।
प्रदोषे चार्द्धरात्रे वा तदा भोगः परेऽहनि। नैतद्वचनद्वयमन्यादिषि
रविंतं देवीपुराणादिकैर्विरुध्यमानमनादरणीयं। इति प्र
पवाय मर्थः। बोपमानाविकल्पयोरपि पाणिनिस्मरणान्न।
यदास्त्रस्तगते प्रदोषे वा मकरसंक्रमे पूर्वदिनं पुण्यं तथार्द्धरात्रेऽपि
द्वितीयदिने पूर्वदिनार्द्धं पुण्यमिति प्यान्विवः। त्रिंशत्कर्कटके ना
नाड्यो मकरे विंशतिस्तथा। वर्तमाने तुला मेषे नाड्यस्तूभयतो द

घन । अर्वाक् षोडश नाड्यस्तु परतश्चैव षोडश । कालः पुण्योऽर्कसं
क्रांतौ स्नानदानजपादिषु । युगांते विषुवे चैव षडशीतिमुखे
ष्वपि । कर्कटे विंशदेवाद्या मकरे त्रिंशदुत्तराः । एतानि वाक्यानि
दिवासंक्रांतिविषयाणि स्यादविरोधः । संक्रांतिश्चेद्रात्रियुग्मे स्यादु
त्रौ वेहासरद्वयं । संक्रांतिं पत्ररात्रीतेयादाना ध्ययते कर्मस्तात
दयत द्वयाविषयेऽत्र ध्यायनत्तदंगदानादिकर्मविषयं वेदितव्य
मिति । अत्र सकलवाक्यपर्यालोचनया निर्णीतोऽर्थः सुखप्रति
पत्तये कथ्यते । मध्याह्नकालत्पूर्वस्य मकरसंक्रमणे तत्पूर्वाः षड
शीतिमुखीनां मिथुनकन्याधनुर्मीनरूपाणां च संक्रमणे पूर्व
दिनमानार्धं पुण्यमत्र परं दिनमानार्धं पुण्यमपरं तत्रापि संनिहित
नाडीनां पुण्यतमत्वं मंदादिसंक्रांतिभेदेन त्रिचत्वाः पंचादिघटिको
त्मको विशेषपुण्यकालः पुण्यतमत्वेन ग्राह्यः । तत्रैव चेद्दिवारा
त्रमंतरप्यावसुपदीनां मध्याह्न वृषसिंहवृश्चिककुंभरूपाणां
काचित्संक्रांतिर्भवति तदादिनोत्तरार्धं पुण्यं दिनपूर्वार्धं पुण्य
तरं संनिहित पंचपंचघटिकानां पुण्यतमत्वं । मंदादिकतो विशेषकालः
पुण्यपुण्यतमः । तत्रैव चेद्दिवद्वयं तुलामेषसंक्रांतं भवेत्तदा पूर्वदि
नार्धमंतरं च पुण्यं । तत्राप्युभयपक्षोऽपि दशदशघटिकाः पुण्य

त्रि० ५१

तराः अत्रीवसंनिहिताः पंच पंच घटिकाः पुण्यतमाः । मंदादि
विशेषोक्तं कालः पुण्य पुण्यतमोः । तथा दिनोदयादारभ्य
प्रथमा द्वितीयादि घटिका मारभ्य मकरसंक्रमे तथा । षडशीति
मुखीनां चैरवि संक्रमणे तदा पूर्वा घटिकाः सर्वाः पुण्याः उत्त
रा सर्वापि अस्तमयं यावत्तु रायतराः संनिहिता संनिहिताः
पुण्यतमाः मंदादिषु पुण्यकालः पुण्यतमः । यत्तिवे वय ।
दिनेनैव दत्तिरण मयंना विष्णुपद्यो भवेत् । तत्रोत्तराः सर्वा घ । युः
टिकाः पुण्याः । पूर्वाः पुण्यतमाः मंदाफल घटिका पुण्य पु
ण्यतमाः अयनेतानि विशेषो ग्राह्याः । तत्रैव चेत लग्न मेषो
तदोभयतानि संनिहिताः पुण्यतमाः तदुत्तरा पुण्यतरा ततो
एकतराशयाः मंदादि भेदेन तानाः पुण्य पुण्यतमाः एवमप
राह्णेपि एक द्वित्रादि घटिकावशेषे दिनजातानां मकरा
दिकर्कादि संक्रांतीनां विषुवतीसहितानां षट्सु वृद्धिपरी
त्येन भोगेन यथा तत्परिकल्पनीयं यथा तयथा । दिवस
स्यांते राह्निमध्ये पाश्चात्या घटिका एक द्वित्रादि समये भवंति
लीलो मकर मेषादि संक्रांति षडशीति मुखे तनवेषुः तदा
पूर्वा घटिकाः सर्वाः पुण्याः उत्तराः पुण्यतराः संनिहिताः

पुण्यतमाः। मंदादिविषयोक्ताः पुण्यतमाः। यदि वा तत्रैव दलिशा
यनं विस्रपष्टो वा संक्रांतयः स्युः। तदोत्तरास्तु वा घटिकाः पुण्याः।
पूर्वाः पुण्यतराः संन्निहितत्वात् संन्निहिताः पुण्यतमाः। यदि तत्रैव त
लामेस्वोस्याप्तांतदोमयतो निसंन्निहिता पुण्यतमाः। तत्र उत्त
राः पुण्यतराः। तदानंतरघटिका पुण्याः। मंदाद्युक्तघटिकाः
पुण्यपुण्यतमाः। एवं दिवैव भोगो मुख्यो गौणस्त्वेन परिकल्प
नीयः। यतो रात्रौ भोगाभावात् अत्र परात्रि संक्रांतीनां सिद्धां
तः। अस्मात् उपरिमध्यममुहूर्तान् सर्वं मकर कर्कादि द्वादशस्व
पि संक्रांतिषु रविसंक्रमणे सति अर्वाक् दिनेन गतं दिनमा
नार्द्धं पुण्यं॥ एवं दिनोत्तरार्द्धं मिति तत्र पुनरा हैमंध्ये पि अत्र
कालसंन्निहिताः पुण्यतमाः। उत्तरार्धं च पुण्यतराः तत्रस्थं तरजा
पुण्याः। मंदाद्युक्तो विशेषकालः पुण्यतमाः। केवलमध्यरात्रा
दूर्ध्वं मकरकर्कादिषु रविसंक्रमास्य कालतदा आनयैव व्यवस्था
या परादिने पुण्यकालः। एवं मध्ये मकर कर्कादि द्वादश संक्रां
तीनां मध्यात्क विद्वबानि। तत्र च संक्रांतिकाले यानि निर्ण
त्ति। सा चेत् पूर्वदिनोत्तरार्द्धं व्यापिनी लभ्यते। तदा तत्रैव पूर्वदि
नार्द्धं पुण्यकालः। तत दिने पूर्वार्द्धं व्याप्नोति दिनो मैरे संहिताः स्युः द्वि

यष्ठ तदोत्तर पूर्वार्द्धं पुण्य

ति। त्रिंशिन्नाडीरूपा पंचपंचघटिका। पुण्यतमाः पुण्यतराः। पु

२८ ण्याः स्नानदानादिषु वेदितव्याः॥ मंदादिविशेषपुण्य

तमत्वेन सर्वत्र ग्राह्याः। अयनद्वये प्रत्युक्त अधिककालविशे

षः सर्वत्र ग्राह्य एव। यदा च मध्यरात्र मुहूर्तमध्ये संक्रांतौ वर्तमा

नायां तत्र यान्ति पिवर्त्तिनि स चेत् पूर्वदिनार्धं व्याप्नोति। तथोत्तर

दिनपूर्वार्धं च व्याप्नोति तत्र मकरे उत्तरदिने पुण्यं॥ प्रथमे मुहू

र्ते पंचकं पुण्यतमं। द्वितीयमुहूर्तपंचकं पुण्यतरं। तृतीयमु

हूर्तत्रयं पुण्यं। दक्षिणायने च पूर्वदिने पुण्यं। संनिहितमुहूर्त

पंचकं पुण्यतमं। तदुत्तरं पुण्यतरं। तदुत्तरं पुण्यं। मंदादियुक्तो

विशेषः पुण्यपुण्यतमत्वेन ग्राह्यः। पश्चात्सर्वसंक्रांति

षु उभयदिनेऽपि पुण्यकालः। पित्र्ये पूर्वदिनोत्तरार्धं पुण्यका

लः। दैवे परदिनार्धं पुण्यकालः। पूर्वाह्णो दैविकः अपराह्णः पित

रः स्मृतिः। अत्रापि संनिहितादिना पुण्यतमः पुण्यतरः पु

ण्यकालाः यथायोग्यं योजनीयाः। मंदादीनां च विशेषा बोद्धव्याः

। इति संक्रांतिनिर्णयः। अथ युगादीनां निर्णयः। तत्र ब्रह्मपुरा

णे। वैशाखे शुक्लपक्षे तु तृतीयायां कृतं युगं। कार्तिके शुक्लपक्षे तु त्रेतादि न

नवमेऽहनि। अथ भाद्रपदे कृष्णे त्रयोदश्यां तु द्वापरं। माघे वा पौर्णमास्यां तु घोर

कलियुगं तथा। सूर्यस्य सिंहसंक्रान्त्यामनन्तकं त्रेतायुगस्य च। अत्र च वृश्चिकसं
क्रान्त्यामनन्तं सत्ययुगस्य च। ज्ञेयश्च वृषसंक्रान्त्या द्वापरं तस्य संततया। त
थाच कुंभसंक्रान्त्यामनन्तः कलियुगस्य च। युगाद्येषु युगान्तेषु श्राद्धमक्षयमु
च्यते। नक्षत्रयोगात् युगादीनां महत्त्वमुक्तं तत्पाद्मे। कृतं तु तृतीया वै
शाखे शुक्लायां रोहिणीयुता। कार्तिके नवमी चैव त्रेता वाक्यया संयुता। त्र
योदशी भाद्रपदे द्वापरं पितृभिः स्मृता। कलिः पंचदशी माघे ह्यमावास
वसंयुता। महायुगादयो ह्येताः श्रवणानक्षत्रयोगतः। अक्षय्यं स्नानदानं च।
श्राद्धमक्षयमुच्यते। युगे युगे वर्षशतैरपि यत्फलं। युगादिकाले दिवसेऽह्नि वेत्।
श्राद्धः प्रयत्नेन युगादिवासरेषु जप दानादि समाचरेद्बुधः। अत्र चापराह्णे व्याप्ति
र्नेतव्या। क्वचित्सा युगादिकं च वयो विदुः। अस्य सर्वापि केका पूर्वसेवा परा
ह्णिकी। श्राद्धं तु पूर्वविद्धा ग्राह्या। पूर्वाह्णः अपरमपराह्णश्च केचित् पूर्वाह्ण इ
पराह्णस्तथा परेति वचनात्। मनुरपि। श्राद्धार्थे तेनादिनाद्विधैव विभजाति।
पक्षावेवापवर्गः पक्षः पूर्वपक्षादिविशिष्यते। तथा श्राद्धस्य पूर्वाह्णादपराह्णो वि
शिष्यते। श्रुतिरपि दिनभागं द्विधैव योत यानि। वसंतो ग्रीष्मो वर्षास्ते देवा
ऋतवः शरद्धेमन्तः शिशिरस्ते पितरो यपता पूर्वपक्षः मासः सदेवा यो पक्षी
पक्षः स पितरो ह्येवाद्देवा रात्रिः पितरः पुनरह्नः पूर्वाह्णो देवा अपराह्णः पितर
इति। श्राद्धार्थं श्रुतिस्मृतिपुराणवाक्यैर्द्विधा विभाग एवोपपन्नः। तत्रा

नि॰ पियुगादयः॥ कुतपकालिन्योगः इत्येते। यतः कुतपस्याद्या घटिका वा

५९ पूर्वाह्णावसानेकर्तृत्वात् मुक्तपदे तत्रैव श्राद्धप्रारंभो विधीयते। कुतपदे

कुतपांत्यघटिकायामपराह्णरूपायां श्राद्धमारंभणीयं। उक्तं च। मुक्त

मस्तस्य पूर्वाह्णे श्राद्धं प्रकुर्याद्विचक्षणः। कुतपस्यापराह्णे तु रौहिणं तु न लं

घयेत् स्मृत्यंतरेपि पूर्वाह्णे वापराह्णे वा यदुक्तं यत्र कुत्रचित्। तस्यां कर्तृत

सद्भावेति ध्येत्तत्कर्मतात्पर्यात्पूर्वत्रापि। देवाः पितृमनुष्याश्च यस्या

वः कालः कथितः स्मृतौ। तत्कालव्यापिनी ग्राह्या तिथिस्तत्कर्मसि

द्धये। तथा मन्वादौ च युगादौ च ग्रहणे चंद्रसूर्ययोः। व्यतीपाते तथैव स्यात्।

तत्कालव्यापिनी क्रिया। इति मतद्वये तृतीयायामपि विशेषः। तदुक्तं भवि

ष्योत्तरे। कस्मादेवेन भगवन्महोदये पार्थिवाग्रतो गासीत्स्नानेन दानैः। प्रियंवदः स

त्यरतो देवब्राह्मणपूजकः। तेन स्रुतेन वा व्यमानं तृतीयायां रोहिणीयुता।

यदा स्यात्तु बुधवारेण तदा सा तु महाफला। अस्यां निष्यात्तयमपीति कृत्त

नदत्तं तेन नास्ति येत्ति कापि तत्रामुनिर्भित्तस्तृतीया। उद्दिश्य यत्स्वरापितृ।

ष्ये= नक्रियते मनुष्यैस्तत्त्वज्ञानयमवत्निभारत सर्वमेव। स्त्रीपुरुषो न तु मधुरासो

वा। तिलसक्तवा चावैशाखेन तृतीयायां मुक्तपदे द्विजोत्तमाः। तस्यां भव।

त्यिहत्ता मृत्तये च स्वधायिनः। अक्षय्यतृतीया प्रोक्ता सर्वपापप्रणाशनी।

जलमन्नहियत्किंचित्कांचनं रूप्यमेव वा। वस्त्रदानं महीदानं गोदानं वा निसंशो

तमाः सर्वान्नयतां यांति सत्यमेव मयेरितं। चतुर्थीसंयुता कार्या शुद्धासा
ममवल्लभा। तृतीया सर्वलोकेषु सात्वेद्रोहिण्यासंयुता। तत्र हं मन्तेगामिष्या
मिथ्याया देवसत्तमाः। मामनुद्दिश्य यद्दत्तं सर्वं विद्धात यं भवेत्। स्नानंदा
नंजपो होमः स्वाध्यायः पितृतर्पणं। पितॄनुद्दिश्य यत्सर्वं भक्त्या योप
पद्यते। वारि धान्यः प्रदानं व्यालंकृत पात्र प्रस्तरितं। द्विजेभ्यो विधिव
देयाः पितॄनुद्दिश्य मानवैः। अत्रेदं तात्पर्यं यदा तत्कृत्यष्टमी यारो
हिणी नक्षत्रसंयुता विशेषो बुधदिने कुतपकालव्यापिनी पूर्वस्मिन्
दिने परस्मिन्वा दिने वा लभ्यते। तदा तत्रैव स्नानश्राद्धादिकार्यं यथो
क्तं। नारदीये विशाखे मल्ले पत्तन तृतीया रोहिणी युता दुर्लभा बु
धवारेण श्रवणेन यथा तथा यागो राविनायकोपेता रोहिणी बुधसं
युता। पितॄणां कुरुते तृप्तिं देवानांच युगामिति। यदा तत्सूर्योदयात्तृ
तीया कुतपकालव्यापिनी व्यावस्थिता तदुपरि तृतीया रोहिणी नक्ष
त्रयुता च बुधवारे भवति। द्वितीयो दिने कुतपकालव्यापिनी तृती
या रोहिणी नक्षत्रसहिता वृद्धिमती लभ्यते। तदा न पूर्वा किंतु परैव
उक्तं च। नारदीये रोहिणी बुधयुक्तापि पूर्वविद्धा विगर्हिता। कृत्वा भक्ता
पि मां यत्र पुण्यं प्राक्तनमिति। यदि चान्निपित... उदयात् कुतपका
लिनी तृतीया लभ्यते। तदापि परैव ग्राह्या तथा चोक्तं। चतुर्थी संयुता का
रिः

ति॰ यस्मिन्नासा मम वल्लभा तृतीया सर्वलोकेषु सा चेद्रोहिणीसंयुतेति। यत्र चोभय

६ः दिनेऽपि परमतद्विवशात् तृतीया कुतपकालव्यापिनी रोहिणीरहिता लभ्यते।

तत्रापि परदिनगतैव ग्राह्या। तदेवोक्तं। गौरी विनायकी यत्र मायन्तयुपेता

प्रकृत। विनापि रोहिणीयोगात् कोटिकोटिफलप्रदेति। यदा तु पूर्वात्र तृती

यार्द्धमात्रकालं व्याप्नोति। तत्रापि स्कन्दविष्णु परैव। वैशाखस्य तृतीयां

वै पूर्वविद्धां करोति यः। हव्यं देवा न गृह्णन्ति कव्यं नैव पितामहाः इति वच

नात्। तथा। युगादयो मन्वन्तराश्च पर्वाणि सोमसवानि च। अनन्तफल

दायित्वकर्तव्यान्यपरेऽहनीति। यदा तु पूर्वदिने द्वितीया कुतपात्पूर्वगे

वास्थिता तृतीया च कुतपं व्याप्य परदिने उदयमात्रमुहूर्तमितरो

हिणी युता भवेत्। अपरदिने काष्ठीयं वर्तते तत्र तृतीयमानं च

वर्धिष्णु तस्मान्नयेन तृतीयायामपि वृद्धिर्भवत्येव। तथा।

युग्माग्निवेश्यमाल[illegible] यायदि तृतीया कुतपे लभ्यते न तदापि द्वितीयैव।

कार्या। तिथ्यादेस्तु भवेद्यावान् ह्रासो वृद्धिः परेऽहनि। तावान् ग्राह्यः

स पूर्वेद्युः अहःशेषोऽपि स्वकर्मणीति। तथा। वर्धमानस्य पक्षस्य उदयात्स्तमन्ते

तिथिः। यदा पक्षतत्वं याति तदा स्यादपराह्णिकेति। एवमन्यान्यपि वाक्या

नि व्यवस्थितानि विस्तरभयान्नात्र लिख्यते। वाक्यविरोधे व्यवस्थाप्यन्ते च।

प्रकृतिवैधं तत्र यत्र स्यात्तत्र धर्मा विभ्रमो स्मृतौ। स्मृति वैधेन विपर्ययः कल्प

व

स्थाप्या=

तीयः पृथक्पृथक् इत्युक्तत्वात् । यानि च द्वितीया घटिकामात्रा
त्तृतीयामेवदूषयेत् । दशमीच घटिकार्द्धेन दूषयत्युत्तरांतिथिं स्कं
देपि । प्रतिपत्सद्वितीयास्याद्द्वितीयास्याद्द्वितीयाप्रतिपद्युताः ।
कार्यात्तृतीययासार्द्धंद्वितीयाकरवनीतु । इत्यादीनिद्विती
यावेधेत्तृतीयानिषेधपराणि । वाक्यान्यकपलभ्यंते । तानिसर्वा
णि उपवासनंदादानादिविषयाणीत्यविरोधः । यतः । भविष्योत्त
रे व्रतयत्तृतीयासावपियुगादिषु पि उपवासान्निर्वृत्तानि हरि
हरादिदेवतानांप्रीतयेकाम्यानिस्मृयंते । तथाच । युधिष्ठिरउवा
च । श्रुतमेवंहिदेवेशत्वद्वक्त्राद्भाविताकात्मना । तंकथ्यमानमिच्छामि
मिश्रंधर्मप्रसंगतः । यत्रापवर्णितैर्दत्तंजन्मवांछमहद्भवेत् । श्रीकृ
ष्णउवाच । पुराउपांडवनेवास्मि रहस्यंदेवनिर्मितं । यन्मयाकस्य
चिन्नोक्तंसाप्रियस्यापिभारत । वैशाखमासस्यतुयातृतीयानव
म्यसौकार्त्तिकशुक्लपक्षे । नभस्यमासस्यतुकृष्णपक्षेत्रयोदशीपंचदशी
चमाघे । वैशाखस्यतृतीयायांसमारब्धंकृतयुगंनृप । नवमीकार्त्तिके
यातुत्रेतायुगसमाश्रया । त्रयोदशीनभस्येतुद्वापरेणसमागता ।
माघेपंचदशीराजन्कलिकालादिरुच्यते । एताश्चतस्रोराजेंद्रयुगा
नांप्रभवाश्चयाः । युगादयःस्मृताःकथ्यंतेतेनैताःसर्वेस्तारिभिः । उपवासस्तपो

त्रि
६२

दानं जपहोमः क्रियास्तस्या युगायुताः क्रियन्ते किं वित्तकोटिः कोटिगुणां भवेत्।
वैशाखस्य तृतीयायां श्रीसमेतं जगद्गुरुं। नारायणं पूजयेद्यः पुष्पधूप
विलेपनैः। वस्त्रालंकारसंभारैर्नैवेद्यैर्विविधैस्तथा। लवणास्यां ढकोमां
न धेनुरथ्यान्तैश्चलः शनैः। कार्यक्रिकृत्कलमेष्टचतुर्भागेन वत्सकः। अथवि
चर्मोपरिस्थाप्य कल्पनीयस्तथा विधानतः। तपास्त्रोक्तक्रमयोगेन ब्राह्मणा
य पादयेत्। श्रीधरः श्रीपतिः श्रीमान् श्रीशो मे प्रीयतामिति मंत्रेणैतां वि
धिना दत्त्वा धेनुं विप्राय भारत। गोसहस्रप्रदानस्य श्रोतीहत्संप्राय यः। तथै
व कार्तिके मासि नवम्यां नक्तभुक् नरः। स्नात्वा नदीतडागेषु वापीकू
पेष्वथवा पुनः। उमासहायं वरदं नीलकण्ठमिहार्चयेत्। पुष्पधूपादि
नैवेद्यैरनन्तैः शंकरं शिवं। धेनुं तिलमयीं दद्यात् पुराणोक्तविधान
तः। अत्र मूर्तिर्नीलकण्ठः प्रीयतामिति कीर्तयेत्। यस्त्रप्राप्यते पुण्यं

न

पार्थ नक्तैकवेरायते दत्वा तिलधेनुं शिवलोकमवाप्नुयात्। त्रयोद मंयी
शीनभस्ये याकु साश्वनस्यां समर्चयेत्। पितृन् पायसदानेन मधुना
च घृतेन च। भोजयेद्ब्राह्मणान् भक्त्या वेदवेदांगपारगान्। पितृनुद्दि
श्य दातव्यास्तत्सांकांस्यदोहनाः। प्रत्यक्षं तर्पिणीर्महाराज तत्कराणि सपय
स्विनी। पितापितामहश्चैव तथैव प्रपितामहाः। प्रीयतां गोप्रदानेन इति
दत्वा विसर्जयेत्। कृतान्तेनैव राजेंद्र तत्फलं प्राप्यते नृप। मिः तत्कोनवाणि

तुं यानि वर्षकोटि शतैरपि पुत्रान् पौत्रान् प्रपौत्रांश्च धनं सुमहदीप्सि
तं । इह चाप्नोति पुरुषः परत्र च शुभां गतिं । पंचदश यान्य माघे स्पृश्य सृजा
यित्वा पितामहं सावित्र्या सहितं देवं वेदवेदांगभूषितं । नवनीत
मयं धेनुं फलैर्नानाविधैर्युतां सहिरण्यां सवत्सां वस्त्रालंकारा यानि
वेदयेत् । कीर्तयेत्सावित्रीयत्ना मन्त्रपयोनिः पितामहस्य यत्स्वर्गे यच्च
पाताले यच्च मर्त्येषु दुर्लभं तत्प्राप्नोति संदेहं पद्मयोनिप्रसादतः ।
यानि चान्यानि दानानि दत्तानि स्वल्पान्यपि युगादिषु महाराजे
अदत्तयानि भवंतिहि । अल्पमल्पं हि यः कश्चित्तद्दद्यान्निर्धनोऽपि स
न्नात्तदक्षयं भवेत्सर्वं युगादिषु न संशयः । पितामहसास्त्वितां त्वा पित
वान्यापि विप्रायान्नसारं राविवस्यमश्राव्येन समाधिना भू
हिरण्यं गंधवासः शयनान्यासनानि च । छत्रोपानहयुग्मानि प्रदे
यानि युगादिषु एवं दत्वाय या शक्त्या पूजयित्वा द्विजानपि । पश्चाद्भुं
जीत स मनावाग्यतः स्वजनैः समं । यत्किंचित्मानसं पापं वाचिकं कायकं
न वा । तत्सर्वं नाशमायाति युगादितिथिपूजनात् । उपगीयमानो गं
धर्वैर्हूयमानः सुरासुरैः । रमते चाक्षयं कालं स्वर्गलोके न संशयः । यदि
यत्नेक मधिकोटिशतानि राहुः स्नानजपानि यममक्षयमेति सर्वं स्वाद
देयाम्बु युगादिषु एवंविधिपीयुसजन व्यासादयो मुनिवराः समस्तहंति ॥

त्रि॰ ॥इतिभविष्योत्तरेयुगादितिथिव्रतमुक्तं॥ तद्विषये घटिकैकादि
६२ पराणि विनीयोयास्तत्तीयाविषये वेदितव्यानीत्यनवद्यं॥ मंगल
लमस्तु शुभं भवतु॥ छ॥ श्री॥ समाप्तोयं ग्रंथः॥ श्रीकृष्णार्पणमस्तु
नरमेकाकृतिः कालेकालेकोटिसंमिता। स्वकालेयांतिदातारं ख॥ रू
यः पितरः सुराः। तत्रापदत्तं विरागास्ते शापं दत्त्वा व्रजंति हि। अतीता
नागते काले होमदानादिकं कृतं। ऊषरे वापितं बीजं तद्वत्तन्नि॰
ष्फलं। पितृदेवमनुष्याणामायः कालः प्रकीर्तितैः। तत्कालव्या
पिनी ग्राह्या तिथिः कर्मसिद्धये। दर्शाच पौर्णमासी च साग्निकैः पूर्व
संयुता कर्तव्या। नाग्निहीनैस्तु मनुराह प्रजापतिः। पौर्णमासीद्वये प्राप्तेऽ
कार्या निरग्निकैः पश्चात्। एषा विशेषः साग्नहुगादीनां प्रशस्यते।
तथा हि ह्यपुनः प्रागेव तत्कालव्यापिनी तिथिः। श्राद्धं तत्रैव कर्तव्यं कृ
सद्वृद्धिनिकारणं। मासि भाद्रपदे शुक्ला दूर्वासंज्ञा तथाष्टमी। सिंह
स्थे सा च कर्तव्या न कन्यास्थे कदाचन। सिंहस्थे सोत्तमा सूर्ये नादि
नेऽप्यनिमे स्त्रमोद्दूर्वा नित्यैव कर्तव्या मासद्वयो च न विद्यते। नभस्य व्यति
रेकेण अष्टमी याऽत्र पूज्यते। तत्र घाता हि ततस्यां कोऽपि व्याय
जायते। आधिकं चैव वर्षेषि संस्पृशी सावधीयते। सत्यकाराप्यतेद
वीध्याससस्य वचनं यथा। दिवुवाच। भ्रगस्त्याय प्रदितेनानपूजयेदज

रामरं। वैधव्यं पुत्रशोकं च दशजन्मनि पंचवं अगस्त्यउदिते नानस्त्री
स्नानं समाचरेत्। नार्घं प्रदापयेत्तस्या दूर्वांचैव न पूजयेत्। कन्यागते ते
सवितरि पूजयेदगस्तोद्भवा। विधवा कन्या भवेत्सा च सप्तजन्मनि पंचवं।
श्रावणशुक्लपक्षे पूजये दूर्वारामरं। सप्तवर्षकृतं पापं दहत्येक। पिता
मृणी। अधिमासे न संप्राप्ते तमस्य उदये कृ यैः। अत्र चाद्भैव प्रकर्तव्या।
श्लो= बुधैश्चैवं हि सर्वदा। श्रावणे चैव मासेपि अगस्त्यो नोदयेद्यदि। शुक्ले
वा यदि वा कृष्णे दूर्वां चैव न कारयेत्। उत्तमा शुक्लपक्षेन कृष्णे चैव न
मध्यमा। तत्तन्मानेन कार्यं तत्रा दोषपना विद्यते॥ २॥
स्वस्ति। संवत् १५७४ वर्षे चैत्र शुदि १० रवौ अद्येह श्रीवटपद्रनगरे वास्त
व्यामात्यश्री चक्रभंजित सुतेन गोविंदेन अनंतभट्ट निर्बंधं श्रीकेशव
पराप्तत लिखित्वा दत्तं॥
पित्रोस्तुजीवतोः पुत्रस्तत्पित्रोरपि जीवतो॥ आम्नातामभ्युदयश्राद्धं मातृपूर्वमेव
केवलं॥२

६३

नं. १३०

इति तिथ्यनिर्णयः संस्कार ~~समाप्तः~~

~~१=२=१८८~~ पत्रे ६३ नं. २५२९

असिल प्रतिलिपि कीगयी — ९ – २००१ को समाप्त हुई।

पत्र ६३

नं. १३०